यमेवचेत्किंवास्यनानायोनिषुप्रवर्तमानस्यकार्यंप्रयोजनम् ॥ अथवानानायोनिषुप्रवर्तमानस्यतूष्णींभूतस्यस्वेमहिम्निस्थितस्यसंसारानुप्रवेशेअसुखमनर्थजातंकिंवाभवतिहेविद्वन्ब्रूहिसर्वंयथावत् ॥ तथाचब्रह्मविदामेकःपुंडरीकोभगवान्याज्ञवल्क्यः ॥ ततएवसर्वस्यसृष्टिमुक्त्वातस्यैवजीवात्मत्वमभ्युपगम्य ॥ यद्येवंसकथंब्रह्मन्पापयोनिषुजायत ईश्वरश्चकथंभावैरनिष्टैःसंप्रयुज्यतइति कोसौनियुंक्तइत्यनेनभगवतोक्तमेवब्रह्मजीववादपक्षंवावदूकचोद्यंस्वयमेवस्पष्टमुक्तवान् ॥ १९ ॥ एवंपृष्टःप्राहभगवा

ष्टिप्रवेशादिकमित्याशंक्याहाथवेति चतुरंगादिक्रीडापिसुखार्थमेवक्रियतेनचपरस्यसुखलिप्सास्तिनचस्वात्मानंस्वयमेवसंकटेपातयतःसुखंवास्तीतिनपरस्यस्वतःसृष्टौप्रवृत्तिःसंभवतिनापितेनसहजीवस्याभेदःसंभवति जीवपरयोर्भेदेतुजीवादृष्टानुरोधेनराजवत्परोजीवभोगार्थंसृष्ट्यादौप्रवर्ततेस्वकृतमर्यादापरिपालनार्थंचेतियुज्यतेऽतःनतयोरभेदःसंभवतीत्यर्थः ॥ १९ ॥ उत्तरमाह दोषइति विभेदयोगेविशेषणभेदोययोस्तौविभे

24

दौविभिन्नौतयोर्योगेअभेदेनऐक्येमहान्दोषः अन्यस्यान्यात्मत्वासंभवात् अतोजीवपरयोस्तात्विकोभेदोनयुक्तइत्यर्थः किंतर्हिअनादियोगेन न
अतुंशीलमस्येत्यनादिर्भोग्यवर्गःस्थूलसूक्ष्मदेहद्वयात्मकानिक्षेत्राणितैःसहयोगेनसंबंधेनपुंसः परस्मात्सकाशात्नित्याःजीवाः घटाकाशजलचंद्रा
दिन्यायेनभवंति तथातेनऔपाधिकेनभेदेनास्यआधिक्यंकिंचिदपिनअपैति नहिजलचंद्रेकंपमानेमुख्यश्चंद्रःकंपते नापिघटाकाशेचलति
मुख्येआकाशेचलनंसंभाव्यते तथाचश्रुतयः एकएवतुभूतात्माभूतेभूतेप्रकाशते एकधाबहुधाचैवदृश्यतेजलचंद्रवत् यथाह्ययंज्योतिरात्माविव
न् ॥ दोषइति ॥ यद्येवंचोदयतएषोभि[illegible]ायः ॥ नियोज्यनियोक्तृत्वादिभेददर्शनादेकस्यकूटस्थस्यतदसंभवाद्भेदेनभवितव्यमिति ॥
तत्र यदिब्रह्मणएवनानात्वमभ्युपगम्य[illegible]ते चेत् ॥तदातस्मिन्भेदयोगेब्रह्मणोनानात्वयोगेदोषोमहान् ॥कोदोषःद्वैतिनोह्यतथावादि
नोवैदिकाभवेयुः ॥ वेदहृदयंपरमार्थमद्वैतंचबाध्यंस्यात् ॥ किंच ॥ नानारूपेणपरिणतत्वात्अनित्यादिदोषोऽस्थूलादिवा
क्यविरोधश्चप्रसज्येत ॥ अथोच्यते ॥ [illegible]नास्माभिर्ब्रह्मणोनानात्वमभ्युपगम्यते ॥ अपितुजीवपरयोर्भेदोभ्युपगम्यतइति ॥

सनत्सुजातउवाच ॥ दोषोमहानत्रविभेदयोगेह्यनादियोगेनभवंतिनित्याः ॥

अत्रहिमहान्दोषःयतोविनाशंप्राप्नोति ॥ श्रूयतेच ॥ मृत्योःसमृत्युमित्यादि ॥ यदाह्येवैषएतस्मिन्उदरमंतरंकुरुते ॥ अथतस्यभयं
भवतीति ॥ अथजीवपरयोर्भेदेभ्युपगम्यमानेतत्त्वमसिअहंब्रह्मास्मिअयमात्माब्रह्मइत्येवमादिश्रुतिस्मृतीहासपुराणभाषितत्वाद
वैदिकत्वंनाममहान्दोषोभवति ॥ कथंतर्हित[illegible]वत्पक्षेजीवेश्वरादिव्यवहारभेदःकथंवातेषांनित्यत्वमितितत्राह ॥ अनादियोगेन
भवंतिनित्याः ॥ अनादिरविद्यामाया ॥ तथाचोक्तं ॥ प्रकृतिंपुरुषंचैवविद्ध्यनादिउभावपि ॥ अनादिमाययासुप्तोयदाजीवः
वस्वानपोभिन्नाबहुधैकोनुगच्छन् उपाधिनाक्रियतेभेदरूपोदेवःक्षेत्रेष्वेवमजोयमात्मा घटसंवृतमाकाशंनीयमानेयथाघटे घटोनीयेतनाकाशं
तद्वज्जीवोनभोपमइत्याद्याऔपाधिक[illegible]जीवपरयोर्भेदंदर्शयति एकधेतिईश्वररूपेण बहुधेतिजीवरूपेण एकएवशुद्धःजलाशयतरंगचंद्रन्या
येनप्रकाशतइत्यादिश्रुतेरर्थः एवंचजीवेशभेदप्रयुक्तःसर्वोपिव्यवहारःसेत्स्यतिनचपरांतरकल्पनावतरतीतिसिद्धं कथंभूतेनअनादियोगाख्येन

येनप्रकाशातइत्यादिश्रुतेरर्थः एवंचजीवेशभेदप्रयुक्तःसर्वोपिव्यवहारःसेत्स्यतिनचपरांतरकल्पनावतरतीतिसिद्धं कथंभूतेनअनादियोगाख्येन

क्षेत्रसंबंधेन अनादियोगेनअनादिनाआदिशून्येनाज्ञानेनहेतुनायोगः संबंधोऽस्यसोनादियोगस्तेनभवंति जन्मादिभाजइतिशेषः पुंसःपुमांसः प्रबुद्ध्यते ॥ अजमनिद्रमस्वप्नमद्वैतंबुध्यतेतदा ॥ अनादिभावंर्याद्दज्ञानेनैवनिवर्त्ततेतदज्ञानमिति ॥ प्राज्ञेक्षणंसंप्रचक्षतेश्रुतयः ॥ अनीशयाशोचतीमुह्यमानः ॥ देवात्मशक्तिंस्वगुणैर्निगूढां ॥ नतंविदाथयइमायजानान्ययुष्माकमंतरंबभूव ॥ नीहारेणप्रावृताजल्प्याचासुतृपउक्थशासश्चरंति ॥ नीहारंतमोऽज्ञानमित्यर्थांतरं ॥ मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरमिति॥इंद्रोमायाभिःपुरुरूपईयते ॥ अजामेकांलोहित ॥ अनृतेनहिप्रत्यूढा ॥ अज्ञानेनावृतंज्ञानंतेनमुह्यंतिजंतवः ॥ इत्याद्यास्मृतयोपि ॥ यत्साक्षादपरोक्षाद्ब्रह्मअयमात्मासर्वांतरमितिवा ॥ तद्योगेनमायायोगेनभवंतिजीवादयोनित्याः ॥ अद्वितीयस्यापिपरमात्मनोमाययाबहुरूपत्वमुपपद्यतेइवेत्यर्थः ॥ श्रूयतेचैकस्यैवबहुरूपत्वं ॥इंद्रोमायाभिःपुरुरूपईयते ॥ एकोदेवःसर्वभूतेषुगूढः ॥ एकंसद्विप्राः ॥ एकंसंतंबहुधा ॥ एकःसन्बहुधाविचचार ॥ त्वमेकोसि ॥ अंतरजायमानोबहुधाविजायते ॥ तथाचमोक्षधर्मे ॥ एकएवतुभूतात्माभूतेभूतेव्यवस्थितः ॥ एकधाबहुधाचैवदृश्यतेजलचंद्रवदिति ॥ १ ॥ तथाचयाज्ञवल्क्यः ॥ आकाशमेकमितिच ॥ तथाचकावषेयगीतासु ॥ नजायतेम्रियतेवेति ॥ एकश्चसूर्यइति ॥ तथापरमेश्वरआह ॥ एकःसर्वगतोह्यात्मेति एकस्यैवमायाबहुरूपंतस्मात्सएवकारणात्मापरमेश्वरःकार्यात्मानंजीवात्मानंनियुंक्तेकृतप्रयत्नापेक्षःमाययानपरमार्थतःसंसरतिनसंसारयति ॥ तथाचाहभगवान् ॥ अहंप्रशास्तासर्वस्येति ॥ नचाप्ययंसंसरतिनचसंसारयत्प्रभुरिति॥ किंचमायानिमित्तेभेदेऽभ्युपगम्यमानेअस्यपरमात्मनःकार्यकारणात्मनाऽवस्थितस्याधिक्यमाधिपत्यंनापैति ॥ किंचिदपि ॥ मायात्मकत्वात्संसारस्यकूटस्थएवभवतीत्यर्थः ॥ यस्मादेवंतस्मादनादियोगेनअनाद्यविद्यायोगेनभवंति॥ पुंसःपुमांसोजीवाबहवोभवंति अथवा

तथास्यनाधिक्यमपैतिकिंचिदनादियोगेनभवंतिपुंसः ॥ २० ॥

अज्ञानयोगोत्थःक्षेत्रयोगइत्यर्थः ॥ २० ॥ जीवेशयोर्भेदंनिरस्यप्रपंचस्यापिपरमेश्वरात्पृथक्सत्त्वंवारयति यएतद्वेति वाशब्दउपमार्थे यइति

26

पुंस्त्वंविधेयापेक्षया एतत्परिदृश्यमानंजगत्यज्जगदिवभातिसनित्योऽविकारीभगवान्सर्वैश्वर्यसंपन्नःपरमात्मैववाशब्दोमिथ्यात्वद्योतकः यथा
हि यत्रहिद्वैतमिवभवतितदितरइतरंपश्यति अहमद्यस्वप्नेगजमिवाद्राक्षमितिवेदेलोकेचमिथ्यार्थानुवादेइवशब्दःप्रयुज्यते श्रुतिश्च इदंसर्वंयदयमा
त्माब्रह्मैवेदंविश्वंसर्वंखल्विदंब्रह्मेत्याद्याप्रपंचस्यब्रह्मानन्यत्वमाह विकारोनृतंमायातद्योगेनविश्वंकरोतिस्वप्नेंद्रजालवन्नतुकनककुंडलवज्जगद्ब्र

पुंसःपुरुषस्यपूर्णस्यपरमात्मनोमायाअनादिसिद्धा तद्योगेनबहवोभवंति ॥ तथाचसर्वमनुगीतासुस्पष्टमाहभगवान् ॥ इदंजग
दनेकमितिवेदानुशासनं ॥ तथाचाहभगवानपराशरः ॥ आत्मव्यतिरिक्तस्यसर्वस्यमिथ्यात्वं ॥ ज्ञानस्वरूपमत्यंतंनिर्मलं ॥ परमार्थ
तइति ॥ तथाचैतत्स्पष्टमाहभगवान्सनत्सुजातः ॥ ब्राह्मेपुराणेकावषेयगीतासु ॥ असंगेनवेदान्पठध्वमिति ॥ २० ॥
एवंतावदेकस्यैवपरमात्मनोअनादिमायायोगेनबहुरूपत्वमुक्तं ॥ इदानींयदीश्वरस्यकारणत्वंतदपिमायोपाधिकमित्याह ॥ यएत

यएतद्वाभगवान्सनित्योविकारयोगेनकरोतिविश्वं ॥ तथाच
तच्छक्तिरितिस्ममन्यतेतथार्थयोगेचभवंतिवेदाः ॥ २१ ॥

दिति ॥ यएतद्वापरमार्थभूतोभगवान्ऐश्वर्यादिसमन्वितःपरमेश्वरोनित्यःसविकारयोगेनईक्षणादिपूर्वकंविश्वंकरोतीतितथात
त्सर्वंतच्छक्तिर्दैवात्मशक्तिर्मायैवकरोति ॥ नपरमात्माअपूर्वादिलक्षणइतिस्ममन्यते ॥ नस्वतश्चित्सदानंदाद्वितीयस्यकारणत्वं ॥
किंतुमायावेशवशादित्यर्थः ॥ किंतत्रास्यतथाभूतशक्तियोगेप्रमाणमितिचेतत्राह ॥ तथार्थयोगेतस्यपरमात्मनोजगदुपादान
भूतमायार्थयोगेचभवंतिवेदाः तस्यमायासद्भावेवेदाःप्रमाणंभवंतीत्यर्थः ॥ तथाचश्रुतिः ॥ इंद्रोमायाभिरिति ॥ तथाचाहभग

ह्मणोःपरमार्थतोविकारविकारीभावोस्ति ब्रह्मणोप्यनित्यत्वापत्तेरित्यर्थः ननुनित्यंपरिणामिचप्रधानंस्वतंत्रमेवजडस्यजगतोजडमेवकारणमस्तु
सादृश्यात् नतुचेतनंवैलक्षण्यादित्याशंक्याह तथाचतच्छक्तिरिति तथाचतेनैवप्रकारेणस्वात्मनिस्वप्नवज्जगदवभासयंतितस्यपरमात्मनः शक्ति
स्तदनन्यास्तीतिवृद्धोपिमन्यतेस्म तथाचश्रूयते देवात्मशक्तिंस्वगुणैर्निगूढामितिपरास्यशक्तिर्विविधैवश्रूयतइतिच ननुभोग्यत्वातशक्तिःआत्म

स्तदनन्यास्तातिवृद्धापमन्यतरम तथाचश्रूयते ...

नःस्व भाकृत्वादा...तथाथातं शक्तिर्हिनशक्तिमतःपृथग्दृष्टा ... वदजान

बहुस्यांप्रजायेयेतिसत्त्वत्यच्चाभवदित्यादयः चकाराल्लोकेशक्तिग्रहोपितादशार्थयोगेशक्तिशक्तिमतोरभेदेनसंबंधेप्रमाणंभवतीत्यर्थः ॥ २१ ॥ एवंजी

वेशयोरभेदाज्जगतोमिथ्यात्वाज्जगज्जन्मादिनिमित्तभूतायाः प्रकृतेर्ब्रह्मानन्यत्वाच्चब्रह्माद्वैतंसिद्धं तेनमृत्युर्नास्तीतिपक्षःस्थिरः येषांचमतेकर्मणामृ

वान् ॥ दैवीह्येषागुणमयीममायादुरत्ययेति ॥ २१ ॥ एवंतावत्प्रमादंवैमृत्युमहंब्रवीमिइत्यादिनामृत्योःस्वरूपंतस्यकार्यात्मना

वस्थानंतन्निमित्तंचानेकार्थंदर्शयित्वाकेनतस्यविनाश इत्याशंक्यएवंमृत्युंजायमानंइत्यादिनाज्ञानादेवाभयप्राप्तिंदर्शितांश्रुत्वाप्रा

संगिकेचोद्यद्वयेपरिहृतेकर्मस्वभावपरिज्ञानायप्राहधृतराष्ट्रः ॥ यस्मादिति ॥ यस्माद्धर्मानग्निष्टोमादीनआचरंतीहलोके ॥ केचि

धृतराष्ट्रउवाच ॥ यस्माद्धर्मानाचरंतीहकेचित्तथाधर्मान्केचिदिहाचरंति ॥
धर्मःपापेनप्रतिहन्यतेवाउताहोधर्मःप्रतिहंतिपापं ॥ २२ ॥ सनत्सुजात
उवाच ॥ तस्मिन्स्थितोवाप्युभयंहिनित्यंज्ञानेनविद्वान्प्रतिहंतिसिद्धं ॥

त्तथाऽधर्मानिहआचरंति ॥ किंतेषांधर्मः पापेनप्रतिहन्यतेउताहोस्वित्धर्मःप्रतिहंतिपापं ॥ अथवातुल्यबलेनान्यतरेणान्यस्यवि

नाशइति ॥ अविदुषउभयोरनुभवएव ॥ नान्यतरेणान्यतरस्यविनाशः ॥ विदुषःपुनरनयोरपिज्ञानाग्निनाविनाशइत्याह ॥ २२ ॥

एवंपृष्टःप्राहभगवान्सनत्सुजातः ॥ तस्मिन्निति ॥ तस्मिन्पुण्यापुण्यात्मकेकर्मणिस्थितोपिकुर्वन्नपिउभयंपुण्यापुण्यलक्षणंकर्मानि

त्यंनियमेनविद्वान्ज्ञानेनप्रतिहंतिविनाशयतिकथमेतदवगम्यते ज्ञानेनविद्वान्प्रतिहंतितत्राह ॥ सिद्धंप्रसिद्धंह्येतत्श्रुतिस्मृतीति

त्युनाशस्तेषामपिक्रममुक्तिप्रणाड्याकर्मणांमोक्षहेतुत्वंचस्थितं यस्मात्तुअस्मिन्मोक्षेनिमित्तेधर्मान्अग्निहोत्रादीनिकर्माणिआचरंति किंवामोक्षा

र्थंसंन्यासमेवकुर्वंति अथवाक्रममुक्त्यर्थंकर्माण्येवउपासनासहितानिनकुर्वंतियेषांतुतादृशोमहान्धर्मोनास्तिकिंतुअल्पएवाग्निहोत्रादिर्नित्यानुष्ठाना

त्मकोस्तितेषामपिसधर्मःपापेनरागादिदोषेणहन्यतेउतधर्मएवपापंहंतीतिप्रश्नार्थः ॥ २२ ॥ उत्तरमाहतस्मिन्स्थितावितिद्वाभ्यां उभयंसंन्यासःसो

२७

पासनंकर्मच तस्मिन्मोक्षेस्वस्वरूपेस्थितौस्थितिर्निमित्तंनित्यं अविचलंवाशब्दएवार्थःतयोर्विशेषमाह ज्ञानेनेति संन्यासपूर्वकेणज्ञानेनब्रह्मविषया सिद्धंनित्यनिर्वृत्तंब्रह्मप्रतिहंतिअनृतजडदुःखादिप्रातिकूल्येनसच्चिदानंदात्मकंगच्छतिप्राप्नोति हंतेरत्रगत्यर्थत्वंज्ञेयं तथासोपासनेनकर्मणाअन्यथासिद्धाद्विपरीतंसाध्यंपुण्यंप्रशस्तंदेवतादिभावंउपैति यतःदेहीदेहाभिमानीभवति तथागतंतेनप्रकारेणस्थितंसिद्धंनरदेहाभिमानजंपापमपिकदा

हासपुराणेषु ॥ तथाचश्रुतिः ॥ भिद्यतेहृदयग्रंथिःछिद्यंतेसर्वसंशयाः ॥ क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरइति ॥ १ ॥ यथापुष्करपलाशइति ॥ यथैषीकातूलमग्नावितिच ॥ यथैधांसिसमिद्धोग्निरितिच ॥ क्षणमात्मानुसंधानात्पापंदहतिकोटिशः ॥ अन्यथापापविध्वंसोनभवेत्कोटिपुण्यतः ॥ १ ॥ अन्यथाज्ञानहीनश्चेत्पुण्यमुपैति ॥ तथागतंपापमुपैतितत्फलंचोपभुंक्ते ॥ कथमवगम्यतइतिचेत् ॥ एतदपिश्रुतिस्मृतिइतिहासपुराणादिषुप्रसिद्धं ॥ तथाचश्रुतिः ॥ इष्टापूर्तंमन्यमानावरिष्ठंनान्यच्छेयो

यथान्यथापुण्यमुपैतिदेहीतथागतंपापमुपैतिसिद्धं ॥ २३ ॥
गत्वोभयंकर्मणाभुज्यतेऽस्थिरंशुभस्यपापस्यसचापिकर्मणा॥

ह्यभिनंदंतिमूढाः ॥ नाकस्यपृष्ठेसुकृतेनभूत्वेमंलोकंहीनतरंवाविशंतीति ॥ आनंदानामतेलोकाअंधेनतमसावृताः ॥ तांस्तेप्रेत्याभिगच्छंतियेकेचात्महनोजनाः ॥ त्रैविद्यामामितिच ॥ २३ ॥ किमविदुषअनुभवएवोभयोरुतान्यतरेणान्यतरस्यविनाशइतितत्राह ॥ गत्वेति ॥ गत्वापरलोकंप्राप्यउभयंपुण्यापुण्यसाध्यंफलं ॥ कर्मणापुण्यापुण्यलक्षणेन ॥ भुज्यतेऽस्थिरं ॥ तथाचश्रुतिः ॥ तद्यथेहकर्मचितोलोकःक्षीयतइति ॥ श्रूयतेचबृहदारण्यके ॥ योवाएतदक्षरमिति ॥ अथयेअन्य

चितूउपैति देवभावंप्राप्तोपिकदाचिन्मुच्यतेऽन्यथाजयविजयादिवत्ततोभ्रश्यत्यपीतिज्ञानमेवश्रेष्ठमितिभावः ॥ २३ ॥ गत्वेति उभयंपुण्यस्यपापस्यचफलंस्वर्गनरकाख्यंतच्च अस्थिरंक्षयिष्णुगत्वाप्राप्यपुनरस्मिन्लोकेकर्मणापूर्वसंस्कारानुगुणेनतत्तद्योन्युचितेनयुज्यतेयोगंप्राप्नोति कर्मकृत्वा ॥ १२ ॥
तत्फलंभुक्त्वापुनःकर्मैवकुरुतेतेनकर्मपाशान्नमुच्यतेइत्यर्थः यद्यप्येवंतथापिसचापिकर्मयोगीकर्मणाधर्मेणधर्मरूपेणपापंप्रणुदतिदूरीकरोतिविद्वान्

मुढस्तुकर्मणःफलंस्वर्गपश्वादिकमेवेच्छंतीतिभावः अतोहेतोर्धर्मोबलीयान्नत्वधर्मः इतिहेतोस्तस्यधर्मंकुर्वतः सिद्धिःकालेनरागादिदोषनाशद्वा रामोक्षोप्यस्तीत्यर्थः विद्धीतिपाठेसिद्धिमितिशेषः ॥ २४ ॥ श्लोकद्वयेनाह येषामिति व्रतेयमनियमादिरूपेविस्पर्धाअहमन्येभ्याऽधिकंयमादी थातोविदुरितिच ॥ छांदोग्ये ॥ सचापिसोपिविद्वान्धर्मेणकर्मणापापंप्रणुदतिविनाशयति ॥ तथाचश्रुतिः ॥ धर्मेणपापमपनु दतीति ॥ इहलोकेविद्वान्वक्ष्यमाणलक्षणोईश्वरार्पणबुध्याकर्मानुष्ठाता ॥ तस्यधर्मोबलीयानिति विद्धिजानीहि ॥ ईश्वरेर्पितत्वात्॥ तथाचवक्ष्यति ॥ तदर्थमुक्तंतपएतदिज्याताभ्यामसौपुण्यमुपैतिविद्वान् ॥ पुण्येनपापंविनिहत्यपश्चात्सजायतेज्ञानविदीपितात्मा॥ ज्ञानेनचात्मानमुपैतिविद्वान्नयथान्यथावर्गफलानुकांक्षी ॥ अस्मिन्कृतंतत्परिगृह्यसर्वममुत्रभुंक्तेपुनरेतिमार्गमिति ॥ २४ ॥ ये

धर्मेणपापंप्रणुदतीहविद्वान्धर्मोबलीयानितितस्य
विद्धि ॥ २४ ॥ येषांधर्मेषुविस्पर्द्धाबलेबलवतामि
व ॥ तेब्राह्मणाइतःप्रेत्यस्वर्गेयांतिप्रकाशतां ॥ २५ ॥

षांधर्मेनचस्पर्द्धातेषांतज्ज्ञानसाधनमित्याहश्लोकद्वयेन ॥ येषामिति ॥ येषांविषयपराणांस्वर्गादावुर्वश्यादिभोगश्रवणात् तत्सा धनभूतज्योतिष्टोमादिधर्मेषुविस्पर्द्धासंघर्षोवर्त्तते ॥ अस्मादहमुत्कृष्टतरंधर्मंकृत्वाअस्मादपिसुखीभूयासमिति ॥ बलेबलवता मिव ॥ यथाबलवताराज्ञोबलवंतंराजानंदृष्ट्वाअहमस्मादपिबलवत्तांसंपाद्यएनंजित्वाऽस्मादपिसुखीभूयासमितिसंघर्षोवर्त्तते तद्वद तिफलसंगसहितास्तेब्राह्मणायज्ञादिकारिणःइतःप्रेत्यधूमादिमार्गेणगत्वास्वर्गेनक्षत्रादिरूपेणयांतिप्राप्नुवंति ॥ प्रकाशतांप्रकाशं न्साधयिष्यामिअहमन्येभ्यइतिसंघर्षः विश्वामित्रादिवत्तपस्यभिनिवेशइतियावत् बलवतांमल्लादीनामिव तेयोगिनः ब्राह्मणाःसगुणब्रह्मविदइ तोदेहात्प्रेत्यगत्वाब्रह्मलोकेतेजस्विनः पूज्याभवंतिततोमुक्तिंचब्रह्मणासहप्राप्नुवंति तथाचस्मर्यते ब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे परस्यां

30

तेकृतात्मानःप्रविशंतिपरंपदमिति ॥ २५ ॥ सर्वधर्मश्रेष्ठस्ययोगधर्मस्यफलमुक्त्वाइज्यादिधर्मस्यफलमाह येषामिति अहमेवयज्ञादीन्सर्वोत्कर्षे
णानुतिष्ठेयमितियेषामाग्रहःतेषांतत्यज्ञादिकंज्ञानस्यसाधनंविविदिषोत्पादनद्वाराभवति तथाचश्रुतिःतमेतंवेदानुवचनेनब्राह्मणाविविदिषंति यज्ञे
नदानेनतपसानाशकेनेति त्रिविष्टपंदेवलोकंनतुसत्यलोकं विविदिषाद्यर्थमपिकर्मानुतिष्ठतांआनुषंगिकंस्वर्गफलमपिभवतीत्यर्थः यदाहापस्तंबः

श्रूयतेच ॥ अथयइमेग्रामइष्टापूर्तेदत्तमिति ॥ २५ ॥ येषांविषयानाकृष्टचेतसामनित्यफलसाधनज्योतिष्टोमादौधर्मेनच
स्पर्द्धानचसंघर्षोविद्यतेनवर्तते ॥ तेषांफलनिरपेक्षमीश्वरार्थकर्मानुष्ठानवतांतद्यज्ञादिकंकर्मचित्तशुद्धिद्वारेणज्ञानसाधनं ॥तथाचश्रु
तिः ॥ तमेतंवेदानुवचनेनब्राह्मणाविविदिषंति ॥ यज्ञेनदानेनतपसानाशकेनेति॥ वक्ष्यतिचभगवान् ॥ स्वयमेवशुद्धिद्वारेणैवज्ञान
साधनत्वं ॥ पुण्येनपापंविनिहत्यपश्चात्सजायतेज्ञानविदीपितात्मेति ॥ येयज्ञादिभिर्विशुद्धसत्वाःपरमात्मानमात्मत्वेनावगच्छं

येषांधर्मेनचस्पर्द्धातेषांतज्ज्ञानसाधनं ॥ तेब्राह्मणाइतोमुक्ताःस्वर्गंयांति
त्रिविष्टपं ॥ २६ ॥ तस्यसम्यक्समाचारमाहुर्वेदविदोजनाः ॥

ति ॥ तेब्राह्मणाइतोऽस्मात्कार्यकारणलक्षणाल्लोकात्प्रेत्यमुक्ताःस्वर्गेसुखंपूर्णानंदंब्रह्मयांति ॥इतरतःस्वर्गादस्यवैलक्षण्यमाह ॥
त्रिविष्टपमिति ॥ त्रिभिराध्यात्मिकादिभिःतापैःसत्वादिभिर्जाग्रदादिभिर्वामुक्तंत्रिविष्टपं ॥ अथवातैर्विष्टंप्रविष्टंअविकारिणंपाती
तित्रिविष्टपमिति ॥ २६ ॥ इदानींविदुषःसमाचारमाह ॥ तस्येति ॥ तस्यविदुषःसम्यक्समाचारंवेदविदोजनाःविद्वां
सःआहुः ॥ नैनंयोगिनंमन्येतचिंतयेत् ॥ भूयिष्ठंबहु ॥ बाह्यमाभ्यंतरंजनं ॥ पुत्रकलत्राद्याभ्यंतरंजनं ॥ इतरत्बाह्यं ॥ तथा
तद्यथाम्रेफलार्थेनिर्मितेछायागंधइत्यनूत्पद्येतेएवंधर्मंचर्यमाणमर्थाअनुत्पद्यंतइति ॥ २६ ॥ येतुअकरणेप्रत्यवायंमत्वाधर्मार्थमेवधर्ममनुतिष्ठंति ॥ १३ ॥
नज्ञानार्थनापिस्वर्गार्थंतानाह तस्येति तस्यधर्मस्यसमाचारंसम्यगनुष्ठानंवेदविदोवैदिकत्वाभिमानिनोजनाःसम्यगित्याहुः नतुततःकिंचिदै
हिकमामुष्मिकंवाफलंकामयंते एनंजनंएनानुजनानभूयिष्ठंअत्यंतंनमन्येतनमानयेत किंचित्तमानयेदेवेत्यर्थः तमेवविशिनष्टि बाह्यंआत्म

निवर्णाश्रमवयोवस्थाभिमानित्वात्बहिर्मुखं वैदिकत्वान्निष्कामत्वाच्चआभ्यंतरं यतः अकामहतस्यश्रोत्रियस्यकामोपमर्दतारतम्येनहिरण्यग र्भादर्वाचीनानांमानुषादीनामानंदगणनायांउत्तरोत्तरशतगुणितायां सएकइंद्रस्यानंदः सएकःप्रजापतेरानंदइतिप्रतिपर्यायं श्रोत्रियस्यचाकाम हतस्येतिआनंदोत्कर्षःश्रूयते ॥ २७ ॥ एवंयोगिनामात्मविविदिषूणांनिष्कामवर्णाश्रमाभिमानिनांचधर्मः उत्तममध्यमाधमभावेनप्रोक्तः संप्र

पुत्रमित्रादयोनगृण्हंतितेषामगोचरएववर्ततेत्यर्थः॥ २७ ॥ कीदृशेदेशेवासइत्याह ॥ यत्रेति ॥ यत्रयस्मिन्देशेमृगइवमृगोयथा एकांतेजनरहितेस्थानेआजीव्यवनेस्वस्थस्तिष्ठतितद्वत्सोपिचोरादिपीडारहितेऽन्नपानादिभूयिष्टंबहुलंवर्ततेइतिमन्येतप्रावृषीवतृ णोदकंबहुलंभवतितद्वत् ॥ तृणोलपमितिकेचित् ॥ तृणोलपमितिख्यातंमुनिभोज्यान्नादिष्विति ॥ दूर्वाविशेषइतिकेचित् ॥ तत्रस्थित्वातदन्नपानादिनोपजीवेत् ॥ नानुसंज्वरेत्संतप्तोनभवेत् ॥ अन्यथाऽन्नपानादिरहितेदेशेकथंनामदेहयात्रासिध्येदि

नैनंमन्येतभूयिष्टंबाह्यमाभ्यंतरंजनं ॥ २७ ॥ यत्रमन्येतभूयिष्टंप्रावृषीवतृणोदकं ॥
अन्नपानंचविप्रेंद्रस्तज्जीवेन्नानुसंज्वरेत् ॥२८॥ यत्राकथयमानस्यप्रयच्छत्यशिवंभयं ॥

तिसंतप्तोभवति ॥ ततश्चनयोगसिद्धिः ॥ २८ ॥ तत्राप्येवंविधजनसमीपेवासइत्याह ॥ यत्रेति ॥ यत्रयस्मिन्देशेअकथय मानस्यतूष्णींभूतस्यस्वमाहात्म्यंप्रच्छादयतोयेनकेनचिदाच्छन्नस्ययेनकेनचिदाशितस्ययत्रक्वचनशायिनआत्मानमिवलोकंपश्य तोजडवल्लोकमाचरतःप्रयच्छत्यशिवंभयंजडइतिमत्वा अशिवमकल्याणमवमानादिकंप्रयच्छति ॥ तथातिरिक्तमिवाकुर्वन् ॥ यथाकश्चित्स्थितप्रज्ञलक्षणज्ञोब्रह्मविदितिज्ञात्वाप्रणिपातादिपूर्वकमीश्वरबुध्यासंपूजयतितद्वत् ॥ अज्ञाततयाअतिरिक्तंब्रा तिअहिंसाप्रधानान्योगिधर्मानाह यत्रमन्येतेति यत्रग्रहेऽन्नंपानंचब्राह्मणस्यसंन्यासिनः भूयिष्ठमस्तीतिमन्येतजानीयात् तत्गृहंप्राप्यजीवेत्प्रा णयात्रांकुर्यात् नक्षीणवृत्तिंगृहस्थंपीडयेदितिभावः प्रावृषिवर्षाकालेतृणंचउलपःउच्छ्रिततरंतृणम् उलपोनस्त्रीगुल्मिन्यांनातृणांतरेइतिमेदिनी तृ णोदकमितिपाठांतरं नानुसंज्वरेत्क्षुद्बाधयाआत्मानंनपीडयेदित्यर्थः ॥२८॥ यत्रदेशेअकथयमानस्यस्वमाहात्म्यंअप्रकाशयतःअशिवममंगलंभयं

प्रयच्छाति सप्तस्यंतमिदं भयप्रदेपिदेशेस्थित्वासत्यपिसामर्थ्येतत्रत्यजनमध्येआत्मानंस्वविद्यादिनाअतिरिक्तमाधिकमिवअकुर्वन्स्वोत्कर्षमप्रकाश
यन्योजनोभवतिसश्रेयान्प्रशस्ततरःपरपीडामानंचत्यजेदितिश्लोकद्वयार्थः।२९।ईदृशेनकस्यान्नंभोक्तव्यंतमाह यइति यःपुमान्आत्मानंकथयमा

ह्मणजातिमात्रप्रयुक्तपूजातिरिक्तंपूजांतरंब्रह्मविदनुरूपमकुर्वन्नवमानादिकमेवकुर्वन्योजनः सोऽस्यविदुषःश्रेयान्।।नेतरोयःप्रणि
पातादिपूर्वकमीश्वरबुद्ध्यापूजयति ॥ तथाहमनुः ॥ सन्मानाद्ब्राह्मणोनित्यमुद्विजेतविषादिवत् ॥ तथाचाहपराशरः ॥ स
न्माननात्पराहानिर्नान्याविद्वज्जनेमतेति ॥ जनेनावमतोयोगीयोगसिद्धिंचविंदतीति ॥ २९ ॥ कीदृशस्यतर्हिअन्नंभोज्य
मित्याह ॥ योवाइति ॥ अकथयमानस्यतूष्णींभूतस्यसर्वोपसंहारंकृत्वापूर्णात्मनावस्थितस्यआत्मानंनानुसंज्वरेतनतापयेत् ॥

अतिरिक्तमिवाकुर्वन्सश्रेयान्नेतरोजनः ॥ २९ ॥ योवाकथयमानस्यह्यात्मानंनानुसंज्वरेत् ॥
ब्रह्मस्वंनोपहन्याद्वातदन्नंसंमतंसतां ॥ ३० ॥ नित्यमज्ञातचर्यामेइतिमन्येतब्राह्मणः ॥

ब्रह्मस्वंनोपहन्याद्वा ॥ ब्रह्मनिष्ठासाधनभूतंचैलाजिनपुस्तकादिकंनोपहन्याद्वा ॥ तथाचोक्तं ॥ रत्नहेमादिकंनास्ययोगिनः
स्वंप्रचक्षते ॥ कुशवल्कलचैलादिब्रह्मस्वंयोगिनोविदुः ॥ अन्यदपि ॥ ब्रह्मस्वंब्राह्मणस्वंनोपहन्याद्वा ॥ वासमुच्चये ॥ तद
न्नंतस्यान्नंसंमतंसतांभोज्यत्वेन ॥ ३० ॥ पुनरपितस्यैवसमाचारमाह ॥ नित्यमिति ॥ नित्यंनियमेनअज्ञातचर्यागूढचर्यामेमम
कर्त्तव्यंतिमन्येत ॥ ब्राह्मणोब्रह्मवित् ॥ ज्ञातीनांज्ञातिपुत्रादिप्रभृतीनांमध्येसंनिधौवसन्नैवविद्येतप्रतिपद्येत ॥ किंचनकिंचिदपि
कश्चिदितिकेचित् ॥ योगीनैवविद्येत ॥ पुत्रकलत्रादिकंपरित्यज्यकेवलःस्वात्मनिष्ठोगूढचर्यैवभवेदित्यर्थः ॥ तथाचश्रुतिः ॥

नस्यस्वप्रौढिंदर्शयतोनरस्योपरिनानुसंज्वरेत्परोत्कर्षंदृष्ट्वानसंतप्येत् तथाब्रह्मस्वंयतिश्चब्रह्मचारीचपक्वान्नस्वामिनावुभाविति स्मृतेर्यत्त्यादिभ्योऽद ॥ १४ ॥
त्वायद्भोजनंतद्ब्रह्मस्वभोजनंअकुर्वंश्चयोभवतितदन्नंतस्यान्नंसतांसंमतं असूयारहितस्यश्रद्धापूर्वकंप्रयच्छतएवान्नंभोज्यमित्यर्थः।३०।यःब्राह्मणः
ब्रह्मवित्ज्ञातीनांमध्येवसन्नपिज्ञातयोमेममनित्यंअज्ञाताचर्यायाभिस्ताअज्ञातचर्याः संतुइतिमन्येतज्ञातयोमेयोगगतिंमाज्ञासिषुरितियस्यप्रच्छ

न्नतेजसोमतिः तंब्राह्मणंब्रह्मिष्ठंबुधाःतल्लक्षणज्ञाःविदुः॥ ३ १॥ ईदशींचर्यांविना अनंतरंउपाधिकृतव्यवधानशून्यंआत्मानंप्रत्यंचंनिर्लिंगंअनुमानाद्य

कुटुंबंपुत्रदारांश्चवेदांगानिचसर्वशः ॥ यज्ञंयज्ञोपवीतंचत्यक्त्वागूढश्चरेन्मुनिः ॥ १ ॥ तथाचाहवसिष्ठः ॥ यन्नसंतंनचासंतं

नाश्रुतंनबहुश्रुतं ॥ जानन्नपिहिमेधावीजडवल्लोकमाचरेदिति ॥ अथवानित्यमज्ञातचर्याअज्ञातेचक्षुराद्यविषयभूतेवाचामगोच

रेऽनुदितानस्तमितज्ञानात्मनावस्थितेअशनायाद्यसंस्पृष्टेपूर्णानंदस्वरूपेसर्वांतरेप्रत्यग्भूतेब्रह्मणिचर्यानिष्ठासमाधिलक्षणामेमम

कर्तव्या ॥ नपराग्भूतदेहेंद्रियपुत्रमित्रकलत्रादौस्थूलोहंकृशोहंब्राह्मणोहंक्षत्रियोहमित्येवमात्मिकाकर्तव्येतिमन्येत ॥ सब्राह्मणो

ब्रह्मवित् ॥ तथाचश्रुतिः ॥ यश्चक्षुषानपश्यतिइति ॥ यस्मादेवंतस्मादज्ञातएवब्रह्मणिनिष्ठाकर्तव्या ॥ तस्मात्क्रोधमानादयोऽनि

त्याविषयाश्चेंद्रियाणिच ॥ ज्ञातयश्चसमाख्यातादेहिनस्तत्वदर्शिनइति ॥ इंद्रियादीनांज्ञातिशब्देनोक्तत्वात् ॥ ज्ञातीनामिंद्रि

ज्ञातीनांतुवसन्मध्येनैवविद्येतकिंचन ॥ ३१ ॥ कोह्येनमंतरात्मानं
ब्राह्मणोमंतुमर्हति ॥ निर्लिंगमचलंशुद्धंसर्वद्वंद्वविवर्जितं ॥ ३२ ॥

याणांमध्येवसन्पश्यन्शृण्वन्स्पृशन्जिघ्रनइतिमन्यमानोविजानन्नपिनैवमात्मादिरूपेणविद्येतप्रतिपद्येत॥ तत्साक्षित्वादात्मनः॥

तथाचश्रुतिः ॥ अथयोवेदेदंजिघ्राणीतिसआत्मेति ॥ देहद्वयतद्धर्मानात्मत्वेननगृण्हीयादित्यर्थः ॥ ३१ ॥ कस्मात्पुनरेवंगृ

ह्यतइत्याह ॥ कोह्येनमिति ॥ कोहिब्राह्मणःब्रह्मवितविषयासक्त्याज्ञातीनांसन्निधौवसन् ॥ निर्लिंगंसूक्ष्मं ॥ अचलंक्रियाकर्त्रा

दिशून्यं ॥ शुद्धमविद्यादिदोषरहितंसर्वद्वंद्वविवर्जित मशनापिपासादिधर्मविवर्जितमंतरात्मानंप्रमात्रादिसाक्षिणंमानांत

राविषयीभूतंमंतुमर्हतिज्ञातुंयोग्योभवति ॥ नकोपीत्यर्थः ॥ किंचविपरीततयाजानातिअनात्मविषयीभूतं ॥ एवमुक्तेनप्रकारेण

देहद्वयतद्धर्मतयास्थूलोहंकृशोहंनगच्छामिनपश्यामिमूकोबधिरःकाणःसुख्यहंदुःख्यहमितिब्राह्मणःसन्मंतुमर्हति ॥ तथाचसति

गम्यंअचलंव्यापकंशुद्धंअसंगंसर्वद्वैतविवर्जितंसजातीयविजातीयस्वगतभेदशून्यंहंतुंगंतुं हंतेर्गत्यर्थत्वमत्रज्ञेयं ज्ञातुमित्यर्थःकोऽर्हतिनकोपीत्यर्थः

पाठांतरंतुसुगमं ॥ ३२ ॥ आत्माज्ञानेदोषमाह यइति अन्यथाआत्मत्वेनभासमानाद्देहादेर्विपरीतंसंतं अन्यथाकर्त्रादिरूपं शेषंस्पष्टं ॥ ३ २ ॥
ब्राह्मण्यमेवहीयतइत्यर्थः॥ वक्ष्यतिच ॥ यएषसत्यान्नापैतिसज्ञेयोब्राह्मणस्त्वयेति ॥ ३२॥ यस्त्वेवंमनुतेसपापीयानित्याह ॥ यो
न्यथेति ॥ योन्यथाज्ञानात्निर्लिंगमचलंशुद्धंसर्वद्वंद्वविवर्जितं ॥ चित्सदानंदंब्रह्मात्मनासंतंस्वात्मानमन्यथादेहद्वयतद्धर्मात्मत
याकर्ताभोक्तासुखीदुःखीकृशःस्थूलोऽमुष्यपुत्रोऽस्यनप्ताब्राह्मणोहमित्येवमात्मानंप्रतिपद्यते ॥ किंतेनमूर्खेणानात्मविदाआत्मचौ
रेणआत्मापहारिणानकृतंपापं ॥ महापातकादिसर्वंकृतंतेनेत्यर्थः ॥ तथाचश्रुतिः ॥ असूर्याइति ॥ ब्राह्मण्यंप्राप्यलोकेस्मिन्नमू

योन्यथासंतमात्मानमन्यथाप्रतिपद्यते ॥ किंतेननकृतंपापं
चौरेणात्मापहारिणा ॥ ३३ ॥ अश्रांतःस्यादनादानात्संमतो
निरुपद्रवः॥ शिष्टोनशिष्टवत्सस्याद्ब्राह्मणोब्रह्मवित्कविः ॥ ३४ ॥

कबधिरोभवेदितिस्मृतिः ॥ तस्माद्विषयभूतदेहेंद्रियादिष्वात्मभावंपरित्यज्यअज्ञातएववागाद्यगोचरेपरमात्मनिनिष्ठाकर्तव्ये
त्यर्थः ॥ ३३ ॥ अन्यथादेहद्वयमिंद्रियादितद्धर्माननुपपादयतःकिंभवतीत्यतआह ॥ अश्रांतइति ॥ योनात्मभूतदेहेंद्रि
यतद्धर्मानात्मत्वेननोपादत्तेसपुरुषअश्रांतःस्यात्संसारश्रमयुक्तोनभवेत् ॥ अशनापिपासादेर्देहादिधर्मत्वात् ॥ तथाचश्रु
तिः ॥ अशनापिपासेप्राणस्येतिदेहद्वयाध्यासेनतद्धर्माध्यासोभवति ॥ तस्याप्यविद्यैवमूलंइदानींज्ञानादज्ञाननिवृत्तौतन्मूलस्सो
पिनिवर्ततइत्यर्थः ॥ यएवमश्रांततयानिरुपद्रवोभवति ॥ क्रोधलोभभयहर्षादयोभूतदाहीयायोगांतरायाउपद्रवास्तद्धीनोनि
आत्मतत्त्वप्रतिपत्त्युपायमाह अश्रांतइति अश्रांतःश्रमहीनः यतः अनादाताआदानशून्यःनिष्परिग्रहइत्यर्थः अतएवसंमतःशिष्टानां निरुपद्र
वश्चस्वयंभवति तथा शिष्टोपिशिष्टवन्नस्यात्शिष्टत्वंनप्रकाशयेत् पाठांतरे अशिष्टवत्यथेष्टाचरणकृन्नस्यात्किंतुशिष्टएववैदिकमर्यादापरिपालनप

रएवस्यात् कविःक्रांतदर्शी ॥ ३४ ॥ श्वाशुनकः तेसंन्यासिनः स्ववीर्यस्यस्वपांडित्यस्यउपजीवनात्पांडित्यादिकंप्रकाश्यभिक्षामिच्छन्यति
वांताशीभवतीत्यर्थः ॥ ३५ ॥ मानुषेवित्तेचक्षुर्ग्राह्यधनदारादिरूपेविषयेअनाढ्याःदरिद्राःसर्वसंगत्यागिनइत्यर्थः दैवेवित्तेश्रोत्रग्राह्येपार

रुपद्रवःससंमतोविद्वद्भिःशिष्टत्वेनसंमतः॥ शिष्टवन्नस्यात्नआचरेत् ॥ जडवच्चरेत्ब्राह्मणोब्रह्मवित्कविः ॥ ३४ ॥ इदानीमगू
ढचारिणंकुत्सयन्नाह ॥ येयथेति ॥ मूढाःश्वालाइतिप्रोक्ताः ॥ श्वालाश्वानाइतिदर्शनात् ॥ यथाश्वालाःश्वानोमूढावा ॥ वां
तमुद्गीर्णमश्नंति ॥ एवंयेशिष्टाःब्रह्मविदःस्वमाहात्म्यंख्यापयंतःअगूढचारिणोवर्तंतेतेवांतमुद्गीर्णमश्नंतिस्ववीर्यस्योपभोजनात्य
दिदंवांताशनंतदभूतयेअनर्थायैवेत्यर्थः॥ तस्मात्गूढःसन्अशिष्टवदेवसमाचरेदिति ॥३५॥ इदानींयोगिनंप्रशंसयन्नाह ॥ अना

येयथावांतमश्नंतिश्वालानित्यमभूतये ॥ एवंतेवांतमश्नंतिस्ववीर्यस्योपभो
जनात् ॥ ३५ ॥ अनाढ्यामानुषेवित्तेआढ्यावेदेषुयेद्विजाः॥ तेदुर्द्धर्षादुष्प्र
कंप्याविद्यात्तान्ब्रह्मणस्तनुं॥३६॥सर्वान्स्विष्टकृतोदेवान्विद्याद्यइहकश्चन॥

ढ्याइति ॥ अनाढ्याअबहुमताअसक्तात्मानःमानुषेवित्तेजायापुत्रवित्तादिषु ॥ आढ्यावेदेषुवेदप्रतिपाद्याहिंसासत्यास्ते
यब्रह्मचर्यशमादिसाधनेषुयेद्विजास्तेदुर्द्धर्षाःदुःप्रकंप्याश्चविद्यात्तान्ब्रह्मणस्तनुंब्रह्मस्वरूपभूतामित्यर्थः ॥ ३६ ॥ किंच ब्रह्मवि
न्महिमैषः ॥ सर्वानिति ॥ सर्वानग्न्यादीन्स्विष्टकृतःसुष्टुइष्टंकुर्वंतीति ॥ तथाचश्रुतिः ॥ स्विष्टंकुर्वन्स्विष्टकृदिति ॥ देवा
न्प्रत्येकमुद्दिश्यत्यागार्थंविद्यात् ॥ यइहकश्चनसर्वदेवतायाज्यपिब्राह्मणस्यनसमानोब्राह्मणेनब्रह्मविदानसमानइत्यर्थः ॥ नैत

लौकिकेधर्मादौआढ्याःसंपन्नाः तथाक्रतौईश्वरोपासनायां सक्रतुंकुर्वीतेत्युपासनायामपिक्रतुशब्दप्रयोगदर्शनात् वैराग्यपूर्वककर्मोपासनानुष्ठान
परानिर्भयाभवंतीत्यर्थः तनुंस्वरूपं ॥ ३६ ॥ सर्वक्रतुभ्योब्रह्मज्ञानमेवश्रेष्ठमित्याह सर्वानिति स्विष्टंशोभनंइष्टंदिव्यस्रग्अन्नपानादिकंयेयागेनप्रीताः
संतोयजमानायकुर्वंतितेस्विष्टकृतोदेवाःतान्सर्वान्योश्वमेधांतसकलक्रतुकर्तावेदसाक्षात्कुर्यात्सोपिब्राह्मणस्यब्रह्मविदःसमानोनभवति तत्रहेतुः

तस्मिन्निति यतःतस्मिन्स्विष्टेर्निमित्तेस्वयंप्रयततेयत्नवान्भवति अयंभावः स्विष्टंक्रियासाध्यत्वादनित्यफलंब्रह्मतुस्वतःसिद्धमेवाभिव्यज्यतइति तज्ज्ञानफलभूतोमोक्षोपिस्वतःसिद्धत्वान्नित्यइतिनस्विष्टंब्रह्मज्ञानसममिति ॥३७॥ यमिति यंअप्रयतमानंनिरारंभंयादशंमानयंतिदेवादयःसएव दाश्चर्यं ॥ यस्मिन्देवताविशेषेहविषउद्देशत्यागेनफलार्थंप्रयततेस्वयंयजमानः इदमग्नयेइदमिंद्रायेतिसोपिहविष्प्रतियोगीदेवताविशेषोनसमानोब्रह्मविदाकिमुतवक्तव्यं देवपशुर्यजमानोनसमानइति ॥ तथाचमोक्षधर्मे ॥ ब्राह्मणस्यनसादृश्येवर्त्तते सोपिकिंपुनः ॥ ईज्यतेयेनमंत्रेणयजमानोद्विजोत्तमइति ॥ तथाचमनुः ॥ ब्रह्मविद्भ्यःपरंभूतंनाकिंचिदिति ॥३७॥ पुनरपि

नसमानोब्राह्मणस्ययस्मिन्प्रयततेस्वयं ॥ ३७ ॥ यमप्रयतमानंतुमानयंतिसमानितः ॥ नमान्यमानोमन्येतनावमानेनुसंज्वरेत् ॥ ३८ ॥ लोकस्वभाववृत्तिर्हिनिमेषोन्मेषवत्सदा ॥ विद्वांसोमानयंतीहइतिमन्येतमानितः ॥ ३९ ॥

तस्यैवसमाचारमाह ॥ यमिति ॥ यंब्रह्मविदमप्रयतमानंतूष्णींभूतंसर्वोपसंहारंकृत्वास्वेमहिम्निव्यवस्थितंगूढचारिणंकेचिद्विद्वांसःस्थितप्रज्ञलक्षणज्ञाःब्रह्मविदितिज्ञात्वामानयंतिपूजयंतिचेत्सतैः मानितःपूजितोपिविद्वान्नमान्यमानोहमितिमन्यते ॥ तथास्थितप्रज्ञलक्षणानभिज्ञाअज्ञइतिमत्वाअवमानंकुर्वंतिचेत्तस्मिन्नवमानेनिमित्तेनानुसंज्वरेत्नानुतप्येत ॥ ३८ ॥ किंतर्हिमानितेनावमानितेनवामंतव्यइत्याह श्लोकद्वयेन ॥ लोकेति ॥ यदिदंविद्वांसोब्रह्मविदंमानयंतीतितत्तेषांनिमेषोन्मेब्रह्मात्मवित्मानितोभवति यंतुयज्ञादिकर्तायमितिमानयंतिसदेवानांपशुरमानितएव तथाचश्रुतिः अथयोन्यांदेवतामुपास्तेऽन्योसावन्योहमस्मीतिनसवेदयथापशुरेवसदेवानामिति उपास्तेयज्ञादिनातर्पयाति ततोहेतोःआत्मानमन्यैर्मान्यमानमपिमान्यंनमन्येत नापिअभिसंज्वरेत् अवमानेसतीतिशेषः नकारोभिन्नक्रमः॥३८॥लोकःस्वभावादेवमांमानयतिनतुमयिमानयोग्यतास्तीतिमत्वादर्पेनप्रामुयादित्याह लोकइति॥३९॥येनमानयं

तितेपिपशुवन्निर्विवेकत्वादुपेक्ष्याएवनतुदंडनीयाइत्याह अधर्मेति ॥ ४० ॥ नवाइति मानं क्लीबत्वमार्षं मुनेःकर्ममौनंयोगिचर्या मानार्थिनांपरलो
षवत्स्वभाववृत्तिःस्वाभाविकीवृत्तिरितिमन्येत ॥ ३९ ॥ तथाअवमानितोजनैरवज्ञातोविद्वानेवंमन्येत ॥ अधर्मविदुषोमूढाविवे
कहीनालोकाःशास्त्रविवर्जिताः ॥ नमान्यंमानार्हंमानयिष्यंति ॥ अमान्यमपिमानयिष्यंतीत्येतदविदुषांस्वभावइतिमन्येत ॥
अमानितोऽपूजितोविद्वान् ॥४०॥ इदानींमानमौनयोर्भिन्नविषयत्वमाह ॥ नवैइति ॥ नवैमानंचमौनंचसहितौएकत्रवसतःसदा ॥
अयंप्रत्यक्षादिगोचरोलोकोलोक्यतइति ॥ प्रपंचोमानस्यविषयः ॥ असौपरलोकोमौनस्य ॥ कोसौतद्विदुः ॥ तथाचाहभगवान् ॥

अधर्मविदुषोमूढालोकाःशास्त्रविवर्जिताः ॥ नमान्यंमानयिष्यंतिएवंमन्ये
दमानितः ॥४०॥ नवैमानंचमौनंचसहितौवसतःसदा ॥ अयंहिलोकोमान
स्यअसौमौनस्यतद्विदुः ॥४१॥ श्रीर्हिमानार्थसंवासात्साचापिपरिपंथिनी ॥

ओंतत्सदितिनिर्देशोब्रह्मणस्त्रिविधःस्मृतइति ॥ तथाचानुगीतासु ॥ ॐतत्सद्विष्णवेचेति ॥ सायुज्यानि पदानिवैइतितच्छ
ब्दवाच्यंब्रह्ममौनस्यविषयइत्यर्थः ॥ एतदुक्तंभवति ॥ मानात्संसारप्राप्तिःमौनेनब्रह्मप्राप्तिरिति ॥ उक्तंचहिरण्यगर्भे ॥ अन्नांग
नादिभोगेषुभावोमानइतिस्मृतः ॥ ब्रह्मानंदसुखप्राप्तिहेतुर्मौनइतिस्मृतइति ॥ ४१ ॥ इदानींमानार्थसंवासेअपवर्गाभावंदर्शय
ति ॥ श्रीरिति ॥ हेक्षत्रियश्रीर्हिमानार्थसंवासात्मानविषयसंवासात्मानगोचरेप्रपंचेवर्तमानस्यस्वर्गपश्वन्नादिसाधनभूतं ॥
कर्मानुष्ठितःश्रीर्हिभवति ॥ साचापि श्रीःपरिपंथिनीश्रेयोमार्गविरोधिनी ॥ तथाचमोक्षधर्मे ॥ निबंधिनीरज्जुरेषेति ॥ यएवं
कोदुःसंपादः परलोकार्थिनांमौनिनांचइहलोकोदुःसंपादइतिभावः ॥ ४१ ॥ श्रीरिति धनाभिजनैश्वर्यरूपालक्ष्मीःसुखस्यमानरूपस्यसंवासो
धिष्ठानंतथापिसापरिपंथिनीचोरतुल्यापरलोकस्यनाशिनी योगिनांतुसुतरामनिष्टकरीत्यर्थःब्राह्मीब्राह्मणस्ययोग्याश्रीःऋग्यजुःसामात्मिकाऋचः

सामानियजुंषि साहिश्रीरमृतासतामितिश्रुतेः प्रज्ञाहीनेनऋगादीनांरहस्यंनप्राप्तुंशक्यमित्यर्थः ॥ ४२ ॥ तस्यब्राह्मसुखस्यद्वाराणिप्रातिसाधनानि दुराधराणिदुःसंरक्ष्याणि सत्यंयथार्थभाषणं आर्जवंअवक्रता ह्रीःलोकापवादभयं दमइंद्रियनिग्रहः शौचंमृज्जलाभ्यांबाह्यं आंतरंतुमनः

श्रियाभिभूतोमूढःसन्विषयेषुप्रवर्तते ॥ तेनप्रज्ञाहीनेनविद्याहीनेनब्राह्मीब्रह्मानंदलक्षणाश्रीः ॥ तथाचहिरण्यगर्भे ॥ यानित्याचिद्घनानंतागुणरूपविवर्जिता ॥ आनंदाख्यापराशुद्धाब्राम्हीश्रीरितिकथ्यते ॥ सादुर्लभाश्रवणायापिनशक्या ॥ तथाचश्रुतिः ॥ श्रवणायापिबहुभिरिति ॥४२॥ इदानींब्रह्मलक्ष्मीप्रवेशद्वाराणिदर्शयति ॥ द्वाराणीति ॥ द्वाराणिब्रह्मलक्ष्मीप्रवेशद्वाराणि

ब्राह्मीसुदुर्लभाश्रीर्हिप्रज्ञाहीनेनक्षत्रिय ॥ ४२ ॥ द्वाराणिसम्यक्प्रवदंतिसंतोबहुप्रकाराणिदुराचराणि ॥ सत्यार्जवेह्रीर्दमशौचविद्याःषण्मानमोहप्रतिबंधकानि ॥ ४३ ॥ इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैय्यासिक्यामुद्योगपर्वणिकेधृतराष्ट्रसनत्कुमारसंवादेश्रीसनत्सुजातीयेप्रथमोऽध्यायः ॥ १ ॥

संतःसम्यक्प्रवदंति ॥ बहुप्रकाराणिदुराचराणिदुःखाचरणानि ॥ कानितानि ॥ सत्यंयथार्थभाषणंभूतहितंच ॥ आर्जवं अकौटिल्यं ॥ ह्रीःअकार्यकरणेलज्जा ॥ दमोंतःकरणोपरतिः ॥ बहिःकरणोपरतिरितिकेचित् ॥ शौचंमलकल्मषप्रक्षालनं ॥ विद्याब्रह्मविद्या ॥ षडेतानिमानमोहप्रतिबंधकानि ॥ ४३ ॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदभगवत्पूज्यपादशिष्यश्रीशंकरभगवतःकृतौसनत्सुजातभाष्येप्रथमोऽध्यायः ॥ १ ॥

शुद्धिः विद्यावेदशास्त्राधिगमः यथेति एतेषुसत्सुअनादिवासनयाआगतोपिमोहोयथावन्नप्रभवति षण्मानमोहप्रतिबंधकानीतिपाठेस्पष्टोर्थः ॥ ४३ ॥ इतिउद्योगपर्वणिनैलकंठीयेभारतभावदीपेसनत्सुजातीयेटीकायांप्रथमोऽध्यायः ॥ १ ॥

पूर्वाध्यायांतेमौनंब्राह्मीश्रीःसत्यादिषट्कंचमोहात्मकस्यमृत्योः प्रतिरोधकानीत्युक्तं तान्येवप्रश्नपूर्वकंविवरीतुमध्यायांतरमारभते कस्यैषमौनइत्या
दि न्यासपूर्वकंस्वीक्रियमाणोमुनेर्धर्मोमौनसंज्ञःकस्यप्रयोजनस्यार्थेइत्येकःप्रश्नः लोकप्रसिद्धेर्वाङ्नियमोवा अमौनंचमौनंचनिर्विद्याथब्राह्म
णइतिश्रौतप्रसिद्धेरमौनशब्दितात्पांडित्यबाल्यापरपर्यायात् श्रवणमननाख्यात्द्वयादन्यत्तत्समानियतंनिदिध्यासनंवामौनशब्दितं तयोर्मध्ये
ऽत्रकतरन्मौनशब्दाभिधेयमितिद्वितीयः तस्यचभावंस्वलक्षणंब्रूहीतितृतीयः तेनमौनेनविद्वान्मौनंमनःप्राणेंद्रियक्रियाणांनिरवशेषेणोपरमंनि

अथद्वितीयोध्यायः॥अयंहिलोकोमानस्येत्यादिनामौनमाहात्म्यंप्रदर्शितंश्रुत्वाप्राहधृतराष्ट्रः॥ कस्येति॥कस्यकीदृशस्यएषःपूर्वोक्तो
वागाद्युपरमलक्षणोमौनोभवतिकतरंनु ॥ एतयोरसंभाषणात्मस्वरूपयोर्मौनंप्रब्रूहि॥हेविद्वन्इहमौनभावंमौनस्वभावंमौनेनतूष्णीं

धृतराष्ट्रउवाच ॥ कस्यैषमौनःकतरन्नुमौनंप्रब्रूहिविद्वन्निहमौनभावं ॥
मौनेनविद्वानुतयातिमौनंकथंमुनेमौनमिहाचरंति ॥ १ ॥ सनत्सुजा
तउवाच ॥ यतोनवेदामनसासहैनमनुप्रविशंतिततोथमौनं ॥

भावेनविद्वानुतयातिमौनंब्रह्म॥अहोस्विदन्येनकथंमौनमिहाचरंति ॥ १ ॥ एवंपृष्टःप्राहभगवान् ॥यतइति॥यतोयस्माद्वेदाःमनसास
हैनंपरमात्मानंनानुप्रविशंति ॥ तथाचश्रुतिः॥यतोवाचोनिवर्तंतइति॥ ततस्तस्मादेवकारणात्सएववाचामगोचरः॥ परमात्मामौ
नं॥ यद्येवंकिंलक्षणस्तर्हिपरमात्मातत्राह॥यत्रोत्थितोवेदशब्दःयस्मिन्नर्थेनिमित्तभूतेसमुत्थितोवेदशब्दःशास्त्रादिकारणंब्रह्मेत्यर्थः॥

विकल्पंपदमितियावत् तदुतअपियातीतिचतुर्थः कथंवाकेनप्रकारेणमौनमाचरंतीतिपंचमःप्रश्नः ॥ १ ॥ पंचानामपिप्रश्नानांतंत्रेणो
त्तरमाह यतइति यस्माद्धेतोःएनंप्रत्यगात्मानंमनसासहवेदानअनुप्रविशंति यतोवाचोनिवर्ततेअप्राप्यमनसासहेतिवाङ्मनसातीतत्वश्रुतेः
ततोहेतोःमौनमितिएतन्नामेत्यर्थः एतेनवाङ्मनसातीतपदप्राप्तिर्मौनस्यप्रयोजनं तच्चवागादिवाह्येंद्रियनिग्रहरूपंमनोनिग्रहरूपं तेनचक्र
माद्वाह्याभ्यंतरप्रपंचयोरभानंतेनचाभानेनप्राप्यंवाङ्मनसातीतंपदमितिप्रश्नचतुष्टयस्योत्तरमुक्तंभवति पंचमप्रश्नस्योत्तरमाह यत्रोत्थितइति

यत्रअधिष्ठानेभूमब्रह्मात्मनिवेदशब्दस्तथाअयमितिलौकिकशव्दश्चउत्थितः क्षेत्रेअंकुरइवसमुद्रेतरंगइवचाविर्भूतःसभूतात्मातन्मयत्वेनशब्द
मयत्वेनाविभातिप्रकाशते हेराजन् अयंभावः वेदशब्देनवेदस्यसारतरःप्रणवः भूरित्येवऋग्वेदादजायतभुवइतियजुर्वेदात्स्वरितिसामवेदात्ता
निशुक्राण्यभ्यतपत्तेभ्योभितप्तेभ्यस्त्रयोवर्णाअजायंताकारउकारोमकारइतितानेकधासमभरत्तदेतदोमितिबव्हृचब्राह्मणात् तस्यचप्रणवस्यओमि
त्येतदक्षरमिदंसर्वमितिसार्वात्म्यश्रुतेस्तन्मात्राणांचअकारोकारमकाराणांक्रमात्स्थूलसूक्ष्मकारणप्रपंचवाचकानांवाच्यवाचकयोरभेदात्पूर्वपूर्वस्य

अथवा यस्मिन्संवेदिताख्येउत्थितोवाचकत्वेनप्रयुक्तोवेदशब्दइत्यर्थः॥ तथावेदशव्दःप्रतिपाद्यःसंविद्रूपोयंपरमात्मायदिवाचाम
गोचरोपरमात्माकथमेतदवगम्यते संविद्रूपःपरमात्मेतितत्राह ॥ सपरमात्मातन्मयत्वेनज्योतिर्मयत्वेनैवास्माकंविभातिराजन्नेव

यत्रोत्थितोवेदशब्दस्तथायंसतन्मयत्वेनविभातिराजन् ॥ २ ॥
धृतराष्ट्रउवाच ॥ ऋचोयजूंष्यधीतेयःसामवेदंचयोद्विजः ॥
पापानिकुर्वन्पापेनलिप्यतेकिंनलिप्यते ॥ ३ ॥

मेवास्मदनुभवोनात्राविश्वासःकर्तव्यइत्यर्थः ॥ अथवा ॥ श्रुतिस्मृतिइतिहासपुराणादिषुज्योतिर्मयत्वेनप्रतीयते ॥ तथाचश्रुतिः॥
तद्देवाज्योतिषांज्योतिरायुरिति ॥ २ ॥ इदानींवेदस्वभावपरिज्ञानायप्राहधृतराष्ट्रः ॥ ऋचइति ॥ यःपापानिकुर्वन्ऋग्वेदादीन

उत्तरोत्तरत्रप्रविलापनेगुरूक्तयुक्त्याक्रियमाणेस्थूलस्यजगतःसूक्ष्मेलवणोदकन्यायेनप्रविलयोभवति तथासूक्ष्मस्यकारणेकारणस्यतुरीयेधर्मा
त्रावाच्येऽमात्राख्येशिवमद्वैतंचतुर्थमन्यंतइतिश्रुतेर्गलिताखिलद्वैतभानेवाङ्मनसातीतेप्रविलयोभवति अतःप्रणवाख्यशव्दमयत्वेनतत्द्वारावा
ङ्मनसातीतंवस्तुभातीतियुक्तमिति ॥ २ ॥ ननुयदिवेदशब्दमयत्वेनतत्द्वारावाङ्मनसातीतंपदंभातितज्ज्ञानाच्चयथैषीकातूलमग्नौप्रोतं ॥ १८ ॥
प्रदूयेतैवंहास्यसर्वेपाप्मानःप्रदूयंतइतिश्रुतेः सर्वपापनाशश्चभवतितर्हिमौनहीनस्यापिऋगाद्यभ्यासेनतदुभयंभविष्यतीत्याशंकते ऋचइति ॥ ३ ॥

अविचक्षणवाङ्मनसनिग्रहासमर्थं ॥ ४ ॥ छंदांसिवेदाः वृजिनात्पापात् ननुअथागमोयांयांदेवतांनिराहतस्यास्तस्यास्ताद्भाव्यमनु
भवितीतिवचनात् यंयंवापिस्मरन्भावमितिस्मृतेश्च नित्याभ्यासादंतकालेयद्दैवत्यंमंत्रंस्मरतितद्देवताताद्भाव्यमस्यभविष्यतीतिकिंवाङ्मनसानिग्र
धीतेसतेनवेदाध्ययनेनपूयतेनवाएतद्वक्तुमर्हसीत्यभिप्रायः ॥३॥ एवंपृष्टःप्राहभगवान् ॥ नैनमिति ॥ यःपापानिकुर्वन्नृग्वेदादि
नधीतेनैनंप्रतिषिद्धचारिणंऋग्वेदादयोवेदाःपापात्कर्मणःत्रायंते ॥ नरक्षंति ॥ नतेमिथ्याब्रवीम्यहं ॥ एवमेतत्नात्राविश्वासःकर्त्त
व्यइत्यर्थः ॥४॥ किंकुर्वंतिचेत्तत्राह ॥ नछंदांसीति ॥ छंदांसिऋगादयोवेदाःएनंवृजिनंधर्मंनास्तिकंपापकारिणं ॥ अधीतवेदमधी

सनत्सुजातउवाच ॥ ॥ नैनंसामान्यृचोवापियजूंषिचाविचक्षणं ॥ त्रायंतेक
र्मणःपापान्नतेमिथ्याब्रवीम्यहं ॥ ४ ॥ नछंदांसिवृजिनंतारयंतिमायाविनं
माययावर्त्तमानं ॥ छंदांस्येनंप्रजहत्यंतकालेनीडंशकुंताइवजातपक्षाः ॥ ५ ॥
॥ धृतराष्ट्रउवाच ॥ ॥ नचेद्वेदावेदविदंत्रातुंशक्ताविचक्षण ॥

तवेदार्थंमायाविनंधर्मध्वजंमाययावर्त्तमानंमिथ्याचारिणंतंनतारयंतिनरक्षंति ॥ किंकरिष्यंतीतिचेत् ॥ यथाशकुंताःपक्षिणःजातप
क्षाःसंतोनीडंस्वाश्रयंत्यजंति ॥ एवंछंदांसिअंतकालेमरणकालेएनंस्वाश्रयभूतंप्रजहतिपरित्यजंति ॥५॥ एवमुक्तेप्राहधृतराष्ट्रः ॥
नचेदिति ॥ कर्मोदयइत्यादिनानित्यानांकाम्यानांचपितृलोकादिप्राप्तिहेतुत्वेनसंसारानर्थहेतुत्वस्यदर्शितत्वात् ॥ प्रतिषिद्धस्य
इरूपेणमौनेनेत्याशंक्याह नीडमिति मौनाभावेंऽतकालेछंदांस्येवनस्फुरंतीत्यर्थः ॥ ५ ॥ धर्मंस्वाभाविकं शमोदमस्तपःशौचंक्षांतिरार्जवमेव
च ज्ञानंविज्ञानमास्तिक्यंब्रह्मकर्मस्वभावजमितिगीतासूक्तंविना प्रलापः ऋग्यजुःसामभिःपूतोब्रह्मलोकेमहीयते यावतीर्वैदेवतास्ताःसर्वावेदवि

दिब्राह्मणेवसंतीतिब्राह्मणानांमाहात्म्यप्रख्यापकोऽनर्थकोवाक्यसंदर्भः प्रवृत्तइतिशेषः सनातनोऽनादिः॥६॥उत्तरमाह तस्येति अस्यमहतोभूत
स्यनिश्वसितमेतद्यदृग्वेदोयजुर्वेदः सामवेदइत्यादिश्रुतेर्यस्यप्रलापोयंवेदशास्त्रादिप्रपंचस्तस्यैवपरमात्मनः स्वयंअव्याकृतस्यनामरूपात्मनाऽव्या
कर्मणोनरकहेतुत्वेनसंसारानर्थहेतुत्वस्यचदर्शितत्वात् ॥ नवेदावेदविदंत्रातुंशक्ताश्वेदयंवेदाध्ययनादिरूपःप्रलापःकस्माद्धेतोः ॥
अनर्थहेतुत्वेनवेदाध्ययनतदर्थ विचारतदनुष्ठानानिनकर्त्तव्यानिइत्यर्थः ॥ ६ ॥ भवेदेवं ॥ यद्येषएववेदार्थःस्यात्
अन्यएवस्वर्गादेःपरमपुरुषार्थोमोक्षयाख्योवेदार्थः इतरस्यचकर्मराशेःउपासनायाश्वतत्प्राप्तिसाधनज्ञानसाधनांतःकरणशुद्धिसा
धनत्वेनपारंपर्येणपुरुषार्थत्वादेववेदप्रतिपाद्यत्वं ॥ तथाहि ॥ तमेवपरमात्मानंपरमपुरुषार्थंदर्शयतिवेदः ॥ अनंदानामतेलो
काअंधेनतमसावृताः ॥ तांस्तेप्रेत्याभिगछंतिअविद्वांसोऽवुधाजनाः ॥ स्वर्गादिलोकानांअपुरुषार्थत्वमनानंदात्मकत्वं

अथकस्मात्प्रलापोयंब्राह्मणानांसनातनः ॥ ६ ॥ सनत्सुजात
उवाच ॥ तस्यैवनामादिविशेषरूपैरिदंजगद्भातिमहानुभाव ॥

मविद्यावद्विषयत्वेनदर्शयित्वा ॥ आत्मानंचेद्विजानीयादयमस्मीतिपूरुषः ॥ किमिछन्कस्यकामायशरीरमनुसंज्वरेदित्यात्म
विदःकृतार्थत्वंदर्शयित्वा ॥ इहैवसंतोथविप्रः ॥ तद्वयंनचेदवेदीन्महतीविनष्टिः ॥ यएतद्विदुरमृतास्तेभवंति ॥ अथेतरेदुःखमेवापियं
तीत्यात्मविदोऽमृतत्वप्राप्तिमनात्मविदआत्मविनाशमनर्थप्राप्तिंचदर्शयित्वा ॥ यदेतमनुपश्यतीत्यात्मानंदेवमंजसा ॥ ईशानंभूत
भव्यस्यनततोविजुगुप्सतइत्यादिभिर्वाक्यैःतत्स्वरूपतदर्थदर्शनतत्फलानिभूयोभूयोदर्शयित्वाकथमेनंरागादिभिरितस्ततःसमाकृ
ष्यमाणंविषयाभिसक्तंमोक्षयित्वापरमेपदेपरमात्मनिपूर्णानंदेस्वाराज्येमोक्षाख्येस्थापयिष्यामीतिमत्वातत्प्राप्तिसाधनज्ञानसाधनवि
कृतस्यस्वरूपंइदंजगद्भाति नामादिविशेषरूपैरितीत्थंभावेतृतीया नामरूपात्मकोयोविशेषस्तदात्मकस्वरूपस्येत्यर्थःतथाचश्रुतिः तद्धेदंतर्ह्यव्या
कृतमासीत्तन्नामरूपाभ्यामेवव्याक्रियतासौनामायमिदंरूपइतीति हेमहानुभाव निर्दिश्यद्वेवावब्रह्मणोरूपेमूर्तंचैवामूर्तंचेत्यादिनाकृत्स्नंदृश्यमदृश्यं ॥१९॥

चविश्वंब्रह्मरूपत्वेननिर्दिश्यब्रह्मैवेदमितिसम्यक्प्रवदंतीत्यध्यारोपप्रसंगे अपवादप्रसंगेचतत्ब्रह्मविश्वस्मान्मूर्तामूर्तात्विरूपमेववैरूप्यंविलक्ष णंउदाहरंतिवेदाएवअथातआदेशोनेतिनेतिनह्येतस्मादन्यत्परमस्तीतिनेतीत्यादयः अत्रनेतिनेतीतिनञ्द्वयेनप्रकृतेमूर्तामूर्तेनिषिद्ध्यशून्यशेषत्वेप्र

विदिषासाधनत्वेनयज्ञदानादीनिदर्शयतिवेदः ॥ तमेतंवेदानुवचनेनब्राह्मणाविविदिषंति ॥ यज्ञेनदानेनतपसानाशकेनेति ॥ तस्मात्त दर्थत्वेनैवयज्ञादीनांपुरुषार्थत्वं ॥ इतरत्रतुस्वर्गादौश्येनयागादीनामिवापुरुषार्थत्वंसंसारानर्थहेतुत्वात् ॥ तथाचश्रुतिः ॥ प्लवाह्ये तेअदृढायज्ञरूपाअष्टादशोक्तमवरंयेषुकर्म ॥ एतच्छ्रेयोयेभिनंदंतिमूढाजरामृत्युंतेपुनरेवापियंति ॥ यस्मादेवंमोक्षसाधनप्रतिपाद कत्वेनसंसारानर्थनिवृत्तिहेतुत्वंवेदानां ॥ तस्माद्वेदावेदविदंत्रातुंशक्ताएवेत्येतत्सर्वमभिप्रेत्याह ॥ श्लोकत्रयेण ॥ तत्रप्रथमेनपर मपुरुषार्थत्वंपरमात्मानंदर्शयति ॥ तस्यैवेति ॥ तस्यैवपरमात्मनोमायाकल्पितैः नामादिविशेषरूपैरिदंजगद्भाति॥ हेमहानुभाव

निर्दिश्यसम्यक्प्रवदंतिवेदास्तद्विश्ववैरूप्यमुदाहरंति ॥ ७ ॥

कथमेतदवगम्यतेतस्यैवनामादिविशेषरूपैरिदंजगद्भातीति ॥ इंद्रोमायाभिःपुरुरूपईयतइति ॥ मायानिमित्तंबहुरूपंनिर्दिश्य तस्यैवसम्यग्रूपंतदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमित्यादिनाप्रवदंतिवेदाः ॥ द्वेवावब्रह्मणोरूपेमूर्त्तंचामूर्त्तंचेत्यादिनातस्यैवमू र्तामूर्तात्मकंआत्मवज्जगत्स्वरूपंनिर्दिश्यतस्यैवसम्यग्रूपंनेतिनेतीत्यादिनाप्रवदंतिवेदाः ॥ तथाआत्मनआकाशःसंभूतइतिवियदा दिधरित्र्यंतंतस्यैवकार्यंनिर्दिश्यकोशोपन्यासमुखेनतस्यैवसम्यग्रूपंयतोवाचोनिवर्त्तंतइत्यादिनाप्रवदंतिवेदाः॥ तथाहिअधीहिभग वन्नित्यादिनानामादिप्राणांतंजगन्निर्दिश्ययत्रनान्यत्पश्यतीत्यादिनातस्यैवसम्यग्रूपंभूमानंतमसःपरंस्वेमहिम्निस्थितंप्रवदंतिवेदाः॥

नकेवलंवेदाएवअपितुमुनयोपितत्ब्रह्मविश्ववैरूप्यंविश्वरूपविपरीतस्वरूपमुदाहरंति ॥ तथाचाहभगवान्पराशरः ॥ प्रत्यस्तमि सत्केएतस्मादात्मनोऽन्यत्परंकार्यंकारणंवाऽतिरिक्तं नास्तीतिहेतोर्नेतीत्युच्यते नतुशून्यमवशेष्यतइतिश्रुत्यैवब्रह्मणोविश्ववैरूप्यमुक्तं ततश्चयत्प्रभ वत्वेनवेदोमान्यस्तंवेदोक्तमार्गाननुष्ठानेनावजानतोवेदाध्ययनमपिनिष्फलंभवति भगवदाज्ञाभंगदोषादितिभावः श्रूयतेच नतस्यवाच्यपिभा

गोअस्तीति देहाद्यात्मबुद्ध्यापरमात्मानास्तीतिमत्वातंत्यजतः वेदोच्चारणमात्रसंभवेपिफलांशोनास्तीतिश्रुत्यर्थः ॥ ७ ॥ तदर्थमिति यत्विश्व स्माद्विलक्षणंब्रह्मप्रोक्तंतदर्थंतत्प्राप्त्यर्थंएतत्प्रसिद्धंतपःकृच्छ्रचांद्रायणादिध्यानधारणादिचउक्तंतपसाब्रह्मविजिज्ञासस्वेतिश्रुत्याप्रोक्तं तथाएषा इज्यायागादिरपितदर्थमेव तत्रक्रममाह ताभ्यामिति इज्यातपोभ्यांपुण्योत्पत्तिः पुण्येनपापनाशः निष्पापस्तुज्ञानेनब्रह्माकारयाचेतोवृत्त्याविदी

तभेदंयत्सत्तामात्रमगोचरं ॥ वचसामात्मसंवेद्यंतज्ज्ञानंब्रह्मसंज्ञितमिति ॥ तच्चविष्णोःपररूपमरूपाख्यमनुत्तमं ॥ विश्व स्वरूपवैरूप्यलक्षणंपरमात्मनइति ॥ ७ ॥ इदानीमीश्वरार्थमनुष्ठीयमानानांकर्मणां ॥ तत्प्राप्तिसाधनज्ञानापेक्षितशुद्धिद्वारेणपारं पर्येणपुरुषार्थत्वमन्येषांसंसारानर्थहेतुत्वेनापुरुषार्थत्वंदर्शयतिश्लोकद्वयेन ॥ तदर्थमिति ॥ यद्विश्वरूपविपरीतरूपंब्रह्मतदर्थमुक्तं वेदेन ॥ किंतपःकृच्छ्रचांद्रायणादि ॥ इज्याज्योतिष्टोमादि ॥ किंततोभवतीतिचेत् ॥ ताभ्यामिज्यातपोभ्यामसौपूर्वोक्तविनि

तदर्थमुक्तंतपएतदिज्याताभ्यामसौपुण्यमुपैतिविद्वान् ॥ पुण्येनपापंविनिहत्यपश्चात्सजा यतेज्ञानविदीपितात्मा ॥ ८ ॥ ज्ञानेनचात्मानमुपैतिविद्वानथान्यथावर्गफलानुकांक्षी ॥

योगतईश्वरार्थकर्मानुतिष्ठन्पुण्यमुपैतिप्राप्नोति ॥ कर्मजन्याऽपूर्वसंयुक्तोभवतितेनपुण्येनपापंविनिहत्यक्षपयित्वापश्चादुत्तरकालं सक्षपिताशेषकल्मषोजायते ॥ ज्ञानविदीपितात्माज्ञानप्रकाशितचित्सदानंदाद्वितीयब्रह्मरूपोभवति॥ ८ ॥ अथज्ञानेनचात्मा नंपरमात्मानमुपैतिप्राप्नोतिविद्वानात्मवित् ॥ अथचेत् ॥ अन्यथापुनरीश्वरार्थकर्मानुष्ठानेनक्षपिताशेषकल्मषोज्ञानीनभवतितदा वर्गफलानुकांक्षीइंद्रियफलानुकांक्षी स्वर्गादिफलानुकांक्षीसनअस्मिन्लोकेकृतंतद्यज्ञादिकंपरिगृह्यसर्वममुत्रपरलोकेतत्फल

पितात्माप्रकाशितात्मतत्त्वोभवति एतेनइज्यातपसोः साक्षान्मोक्षहेतुत्वनिरसनेनज्ञानकर्मसमुच्चयपक्षोनिर्मूलोवेदितव्यः ॥ ८ ॥ किमात्मतत्त्वप्र काशेनेत्यतआह ज्ञानेनचात्मानमुपैतीति आत्मलाभान्नपरंविद्यते आत्मानंचेद्विजानीयादयमस्मीतिपूरुषः किमिच्छन्कस्यकामायशरीरमनु संज्वरेदित्यादिशास्त्रादात्मप्राप्तिरेवपरमपुरुषार्थइतिभावः विपक्षेदोषमाह अथेति अथेतिपक्षांतरेअन्यथाआत्मज्ञानाभावेनानात्मनिपुरुषार्थत्वबु

ह्यावर्गफलानुकांक्षीभवति वृक्के आत्मानंस्वस्वविषयोपहारमुखेनावृणोतीतिवर्गइंद्रियगणस्तस्यप्रियंफलं विषयसुखंतदाकांक्षीसन्अस्मिन्लोकेकृ
तंयत्पुण्यंपापंवातत्सर्वंपरिगृह्य तंविद्याकर्मणीसमन्वारभेतेपूर्वप्रज्ञाचेतिश्रुतेः तंउत्क्रामंतमितिश्रुतिपदस्यार्थः अमुत्रस्वर्गेनरकेवातत्फलंसुखंदुः
खंवाभुंक्ते ततःपुनरिमंमार्गंलोकंकर्मशेषेणउपैति तस्मिन्यावत्संपातमुषित्वाथैतमेवाध्वानंपुनर्निवर्तते तस्माल्लोकात्परैत्यस्मैलोकायकर्मणइत्या
दिश्रुतिभ्यः संपतत्यनेनेतिसंपातःकर्म ॥ ९ ॥ नन्वेवंतर्हिस्वाध्यायप्रवचनेएवेतिनाकोमौद्गल्यः तद्धितपस्तद्धितपइत्यादरेणाध्ययनाध्यापन

मुपभुंक्ते॥ ततःकर्मशेषेणपुनरेतिमार्गंसंसारमार्गं ॥ तथाचश्रुतिः ॥ तस्मिन्यावत्संपातमुषित्वाअथैतमेवाध्वानंपुनर्निवर्त्ततइति
॥ ९ ॥ इदानींविद्वदविद्वदपेक्षयाकर्मणांफलवैषम्यमाह ॥ अस्मिन्निति ॥ अस्मिन्लोकेयत्तपस्तप्तंतस्यफलममुत्रअमुष्मिन्
लोकेभुज्यते ॥ इतिसर्वेषांसमानं ॥ ब्राह्मणानांब्रह्मविदांपुनरयंविशेषः ॥ तपस्वृद्धंअतीवसमृद्धंफलवृद्धिर्भवतीत्यर्थः ॥ तथाच

अस्मिन्कृतंतत्परिगृह्यसर्वममुत्रभुंक्तेपुनरेतिमार्गं ॥ ९ ॥ अस्मिंल्लोकेतपस्तप्तं
फलमन्यत्रभुज्यते ॥ ब्राह्मणानांतपस्वृद्धमन्येषांतावदेवतत् ॥ १० ॥

श्रुतिः यदेवविद्ययाकरोतिश्रद्धयोपनिषदातदेववीर्यवत्तरंभवतीति ॥ अन्येषामनात्मविदांवैषयिकाणांतावदेतन्नसमृद्धंभवति ॥
यस्यकर्मणोयत्फलंश्रुतंतावन्मात्रफलसाधनंनफलसमृद्धिहेतुर्भवतीत्यर्थः ॥ १० ॥ श्रुत्वैवमाहधृतराष्ट्रः ॥ कथमिति ॥ श्लोको
योर्मुख्यतपस्त्वश्रवणादस्तितयोरपिमोक्षहेतुत्वंतत्कथमुच्यतेनच्छंदांसिवृजिनात्तारयंतीतिमत्वाविद्वदविद्वत्तपसोर्भेदमाह अस्मिन्निति अविदुषां
तपसःफलंआमुष्मिकं विदुषांब्राह्मणानांतुइमेएवलोकाःफलदाः ज्ञानंदृष्टफलमित्यर्थः कीदृशानां धात्वेतपसितिष्ठतां धात्वेधातव्ये कृत्यार्थेतवै
केन्केन्यत्वनइतिधात्रस्त्वन् अवश्यकर्तव्येइत्यर्थः तच्चशमोदमस्तपःशौचमितिप्रागेवोक्तं वृद्धेतपसीतिपाठेस्पष्टोर्थः ॥ १० ॥ समृद्धंविदुषः

असमृद्धंअविदुषश्चएकमेवतपःकेवलंशुद्धंसत्कथं द्वैविध्यंप्राप्नोतीतिपृच्छति कथमिति ॥ ११ ॥ उत्तरमाह निष्कल्मषमिति कल्मषंकामःश्र
द्धादिराहित्यंचतद्रहितंतपःकेवलंकैवल्यसाधनत्वात्केवलमित्युच्यते तदेवश्रद्धाद्युपेतमपिसकामंचेत्समृद्धमित्युच्यते यत्तुकेवलंदंभार्थमेवक्रिय

यंस्पष्टोर्थः ॥ ११ ॥ एवंपृष्टःप्राहभगवान्सनत्सुजातः ॥ निष्कल्मषमिति ॥ यदेतन्निष्कल्मषंतपस्तत्केवलंपरिचक्षते ॥
केवलंबीजमित्युक्तेःसर्वस्यास्यप्रपंचस्यबीजंनिमित्तंयत्तत्केवलमित्युक्तं ॥ आहोशना ॥ गुणसाम्येस्थितंतत्वंकेवलंत्वितिकथ्य
ते ॥ केवलादेतदुद्भूतंजगत्सदसदात्मकमिति ॥ तदेवकेवलंतपःसमृद्धमप्यृद्धंभवतिनान्यथा ॥ यदानिष्कल्मषंनभवतिसक

धृतराष्ट्रउवाच ॥ कथंसमृद्धमप्यृद्धंतपोभवतिकेवलं ॥ सनत्सुजाततद्ब्रू
हिकथंविद्यामतद्वयं ॥ ११ ॥ सनत्सुजातउवाच ॥ निष्कल्मषंतप
स्त्वेतत्केवलंपरिचक्षते ॥ एतत्समृद्धमप्यृद्धंतपोभवतिनान्यथा ॥ १२ ॥
तपोमूलमिदंसर्वंयन्मांपृच्छसिक्षत्रिय ॥ तपसावेदविद्वांसःपरेत्यामृतमा
प्नुयुः ॥१३॥ धृतराष्ट्रउवाच ॥ कल्मषंतपसोब्रूहिश्रुतंनिष्कल्मषंतपः ॥

ल्मषंस्यात्तदासमृद्धमपिअसमृद्धंभवति ॥ १२ ॥ तदेवप्रशंसति ॥ तपोमूलमिति ॥ स्पष्टोर्थः ॥ १३ ॥ श्रुत्वैवमाहराजा ॥
कल्मषमितिअस्यार्थः ॥ निष्कल्मषंतपश्चैतत्केवलंपरिचक्षतइति ॥ श्रुतस्यतपसःकल्मषंब्रूहि ॥ हेसनत्सुजात ॥ येननिष्कल्म

तेतदृद्धं तथाचश्रुतौ यदेवविद्ययाकरोतिश्रद्धयोपनिषदातदेववीर्यवत्तरंभवतीतितरप्प्रत्ययश्रुतेर्विद्याहीनस्यापितपसोवीर्यवत्त्वावगमादृद्धत्वंग
म्यते ॥ १२ ॥ तपएवप्रशंसति तपइति इदंसर्वंभोग्यंतपोमूलंतपःप्राप्यं परंअमृतंमुक्तिं ॥ १३ ॥ ननुनिष्कल्मषंतपः श्रुतंतत्राकिंतत्किल्बिषं

यद्रहितेनतपसासनातनंगुह्यंब्रह्मविद्यांजानीयामितिपृच्छति कल्मषमिति ॥ १४ ॥ तदेवाह क्रोधादयइति क्रोधादिगणोद्वादशकः तावान्
नृशंसवर्गश्चतपसः कल्मषं ज्ञानादिगणविरुद्धत्वात् तद्रहितज्ञानाद्युपेतंतुतपोनिष्कल्मषंमोक्षहेतुरित्यर्थः॥ १५॥क्रोधःइच्छाप्रतीघातोत्थआक्रो

षेणतपसाइदंगुह्यंसनातनंब्रह्माहंविद्यामिति ॥१४॥ एवंपृष्टःप्राहभगवान् ॥ क्रोधादयइति ॥ क्रोधादयोयस्यतपसोद्वादशदो
षाःकल्मषाः ॥ तथानृशंसानिचसप्तहेराजनयस्यतपसोदोषाः ॥ तथाज्ञानादयोद्वादशचातताना विस्तीर्यमाणाः शास्त्रेवेदशास्त्रेयेवि
दितागुणाद्विजानांतान्गुणान्दोषांश्चवक्ष्यामीत्यभिप्रायः ॥ १५ ॥ क्रोधादीन्दर्शयतिक्रोधइति ॥ क्रोधोनामकामप्रतिघातादु
त्पद्यमानस्ताडनाक्रोशनादिहेतुःकामहानिहेतुकश्चांतःकरणविक्षेपोगात्रस्वेदकंपनादिलिंगः १ कामःस्त्र्याद्यभिलाषः २ लोभःपरद्रव्ये

सनत्सुजातयेनेदंविद्यांगुह्यंसनातनं ॥१४॥ सनत्सुजातउवाच ॥
क्रोधादयोद्वादशयस्यदोषास्तथानृशंसानिचसप्तराजन् ॥ ज्ञा
नादयोद्वादशचातताःशास्त्रेगुणायेविदिताद्विजानां ॥ १५ ॥
क्रोधःकामोलोभमोहौविवित्साऽकृपाऽसूयामानशोकौस्पृहाच ॥

च्छान्यायार्जितस्यस्वकीयस्यचद्रव्यस्यतीर्थविनियोगासामर्थ्यंवा ३ मोहःकृत्याकृत्यविवेकशून्यता ४ विवित्साविषयरसान्वेत्तुमि
च्छा ५ अकृपानिष्ठुरता ६ असूयागुणेषुदोषाविष्करणंपरगुणादिष्वक्षमावा ७ मानःआत्मबहुमानत्वं ८ शोकोइष्टार्थवियोगजों
तःकरणविक्षेपोरोदनचिंतनादिलिंगोऽप्रतीकारविषयः ९ स्पृहाविषयभोगेच्छा १० ईर्ष्यापरश्रियामसहिष्णुता ११ जुगुप्सा
परगुणानपन्होतुमिच्छाबीभत्सावा १२ एतेक्रोधादयोद्वादशदोषास्तपसःकल्मषरूपाःसदावर्ज्याः ॥ महागुणेनब्राह्मणेन ॥

शताडनादिहेतुर्मनस्तापः १ कामःस्त्र्यभिलाषः २ लोभोधनव्ययभीरुत्वं ३ मोहःकृत्याकृत्यविवेकराहित्यं ४ विवित्साविषयरसान्वेत्तुमिच्छाविधित्सा
इतिपाठेसत्यप्युत्तरोत्तरलाभेपिपासाख्याअतृप्तिः धेट्पानेइत्यस्यरूपं ५ अकृपानिर्दयत्वं ६ असूयापरगुणेषुदोषदर्शनं ७ मानआत्मनिपूज्यताबुद्धिः ८

शोकइष्टार्थनाशेसतिमनोवैक्लव्यं ९ स्पृहाभोग्यवर्गेष्वादरः १० ईर्ष्यापरोत्कर्षासहिष्णुत्वं ११ जुगुप्सापरनिंदाबीभत्सतावा १२ मनुष्याणांयोगिनाम
योगिनांचैतेदोषाःसर्वेषामपिवर्ज्याइत्यर्थः॥१६॥एतेषांमध्येएकैकोपिमनुष्यंनाशयितुंसमर्थः किंतुकतिपयसमुदायःसर्वसमुदायोवेत्याह एकैकइ

महद्ब्रह्मइतिप्रोक्तं ॥उक्तंचनाममहोदधौ ॥ वर्जनीयाइत्यर्थः महागुणोब्रह्मप्राप्तिगुणःतेनब्रह्मप्राप्तिलक्षणेननमहागुणसमन्वितेनवर्जनीयाइत्यर्थः ॥उक्तंचनाममहोदधौ ॥महद्ब्रह्मइतिप्रोक्तं
महत्वान्महतामपि ॥ तत्प्राप्तिगुणसंयुक्तोमहागुणइतिस्मृतइति ॥ अथवाब्राह्मणानामुत्कृष्टगुणयोगःस्वभावसिद्धःतथाचोक्तं
भगवता ॥ शमोदमस्तपःशौचंक्षांतिरार्जवमेवच ॥ ज्ञानविज्ञानमास्तिक्यंब्रह्मकर्मस्वभावजम् ॥१६॥ एतेषांसदावर्ज्यत्वेहे
तुमाह ॥ एकैकमिति ॥ यथामृगाणामंतरंछिद्रंलिप्समानोरंध्रान्वेषणपरोलुब्धकोमृगयुरनुवर्तते ॥ यथाचछिद्रंलब्ध्वातान्

ईर्ष्याजुगुप्साचमहागुणेनसदावर्ज्याद्वादशैतेनरेण ॥ १६ ॥ एकैकमे
तेराजेंद्रमनुष्यंपर्य्युपासते ॥ लिप्समानोंतरंतेषांमृगाणामिवलुब्ध
कः ॥ १७ ॥ संभोगसंविद्द्विषमेधमानोदत्तानुतापीकृपणोऽबलीयान् ॥

तस्मिन्ने ॥ अथवामनुष्यान्पर्युपासतइतिपाठः ॥ तस्मिन्ने
हंति ॥ तथातेषांमनुष्याणांरंध्रान्वेषणपराएतेक्रोधादयएकैकंमनुष्यंपर्युपासत अथवामनुष्यान्पर्युपासतइतिपाठः ॥ तस्मिन्ने
कैकंमनुष्यान्पृथक्पृथक्पर्युपासतइतियोजना ॥ तथाछिद्रंलब्ध्वातान्हंति ॥ तस्मादेतेषुएकोपिदोषोविनाशकारणं ॥ यस्मा
देवंतस्मात्सदावर्ज्याइत्यर्थः ॥ उक्तंचहिरण्यगर्भे ॥ यथापांथस्यकांतारेसिंहव्याघ्रमृगादयः ॥ उपद्रवकरास्तद्वत्क्रोधाद्यादुर्ग
मानृणामिति ॥ १७ ॥ इदानींनृशंससप्तकमाह ॥ संभोगेति ॥ संभोगेविषयसंभोगेसंवित्यस्यबुद्धिर्वर्ततेससंभोगसंवित् १
ति अंतरंछिद्रं ॥ १७ ॥ संभोगःस्त्रीसंगादिस्तद्विषयासंवित्संमतिस्तदेवपुरुषार्थइतियाबुद्धिः १ द्विषंद्वेषमेधमानोवर्धयन् २ दत्तानुतापी
दानंकृत्वापिलोभवशात्ममधनंनष्टमितिसंतापवान् ३ कृपणःप्राणांतेपिवित्तव्ययमसहमानः ४ अबलीयान्ज्ञानबलरहितः ५ वर्गप्रशंसीवर्गो

वृजिनंपराभिभवस्तत्प्रशंसनशीलः अन्येषांदुःखेनसुखीत्यर्थः ६ वनितासुपरिणीतासुद्वेष्टा ७ एतेसप्तनृशंसाः ॥१८॥ गुणानाह ज्ञानइति ज्ञानं तत्त्वज्ञानं १ सत्यंहिंसावर्जंयथार्थभाषणं २ दमःजिव्होपस्थादिनिग्रहः ३ श्रुतंअर्थग्रहणसहितंवेदाध्ययनं ४ अमात्सर्यमत्सरःपरगुणासहिष्णु

विषमिवपरेषांउपद्रवंकृत्वाएधमानोवर्द्धमानः ॥ अथवाद्विषमेधमानइतिपाठांतरे ॥ द्विषंद्वेष्यंकर्मकृत्वाप्राणिनांतद्द्वारेणएधमा नइति २ दानंदत्वानुतापंकरोतीतिदत्तानुतापी ३ यत्किंचिदर्थलवलाभमात्रलोभात्सर्वावमानंसहतेयःसकृपणः ४ अबलीयान् ज्ञानबलवर्जितः ५ वर्गप्रशंसीइंद्रियवर्गप्रशंसी ६ वनितांचद्वेष्टाअनन्यशरणांभार्यांयोद्वेष्टि ७ एतेपरेपूर्वोक्तेभ्यःक्रोधादिभ्यः सप्तनृशंसरूपाः ॥ १८ ॥ इदानींज्ञानादयोद्वादशउच्यंते ॥ ज्ञानंचेति ॥ ज्ञानंतत्वार्थसंवेदनं ॥ १ ॥ सत्यंयथार्थभाषणंभूत

वर्गप्रशंसीवनितांचद्वेष्टाएतेऽपरेसप्तनृशंसरूपाः ॥ १८ ॥ ज्ञानंचसत्यंचदमःश्रुतंचअमात्स
र्यंह्रीस्तितिक्षाऽनसूया ॥ यज्ञश्चदानंचधृतिःशमश्चमहाव्रताद्वादशब्राह्मणस्य ॥ १९ ॥

हितंच २ दमोमनसोदमः ३ श्रुतमध्यात्मशास्त्रश्रवणं ४ अमात्सर्यंसर्वभूतेष्वसहमानतातदभावोऽमात्सर्यं ५ ह्रीरकार्यकरणे लज्जा ६ तितिक्षाद्वंद्वसहिष्णुता ७ अनसूयापरदोषानाविष्करणं ८ यज्ञोग्निष्टोमादिःमहायज्ञश्च ९ दानंब्राह्मणादिभ्योधनादि परित्यागः १० धृतिर्विषयसंनिधावींद्रियनिग्रहः ११ शमः अंतःकरणोपरतिःबहिःकरणोपरतिरितिकेचित् १२ एतेज्ञानाद योमहाव्रताःपरमपुरुषार्थसाधनभूताःब्राह्मणस्यवर्णिताः ॥ येज्ञानादयोद्वादशचाततानाइतिपूर्वंप्रस्तुतास्तेवर्णिताः ॥ १९ ॥

त्वंतदभावः ५ ह्रीर्लज्जा ६ तितिक्षासत्यपिक्रोधनिमित्तेतदनुत्पादः ७ अनसूयापरगुणेषुदोषाविष्करणमसूयातदभावः ८ यज्ञोज्योतिष्टोमादिः ९ दानंबहिर्वेदिसंविभागः १० धृतिःअत्यंतापद्यपिव्रतादेरत्यागः ११ शमःमनोनिग्रहः १२ ब्राह्मणस्यब्रह्मप्राप्तुमिच्छोः ॥१९॥ यस्त्विति सर्वगुणा

ढ्योब्रह्मवित्सत्यकामादिगुणभाक्भवति यस्तमात्मानमनुविद्यविजानातिससर्वांश्चलोकानाप्नोतिसर्वांश्चकामानितिश्रुतेः ॥ २० ॥ अष्टाद
शदोषत्यागादष्टादशगुणत्वंदमस्याह दमइतिअनृतंस्पष्टं १ पैशुनंपरदोषसूचकत्वं २ तृष्णाधनाद्यभिलाषः ३ कृतेकर्मणिवैदिके

इदानींगुणस्तुतिंकरोति ॥ यस्त्विति ॥ यस्त्वेतेभ्यः पूर्वोक्तेभ्यःअप्रवसेत् ॥ प्रवासंनकरोतितैरेवसमन्वितोभवेत् ॥ ससर्वा
मिमांपृथिवींप्रशिष्यात्प्रशास्ति ॥आत्मवशंकरोति ॥ यएतेषांमध्येत्रिभिर्द्वाभ्यांएकतःएकस्माद्वाऽविमुक्ताःएतेषामन्यतमेनापिस
मन्विताः ॥ तएतेक्रमेणविमुक्ताःविशिष्टज्ञानिनोभूत्वामौनभूताभवंतिब्रह्मविदोभवंति॥२०॥इदानींदमदोषानाहश्लोकत्रयेण ॥
दमइत्यादिना ॥ दमोऽष्टादशदोषःअष्टादशदोषसमन्वितोभवति ॥ किमितितेषांदोषत्वमितिचेत्प्रातिकूल्यंकृतेभवेत् ॥ एतेषा

यस्त्वेतेभ्योऽप्रवसेत्द्वादशेभ्यःसर्वामिमांपृथिवींसप्रशिष्यात् ॥ त्रिभि
र्द्वाभ्यामेकतोवाविमुक्ताःक्रमाद्विमुक्तामौनभूताभवंति ॥ २० ॥ दमो
ष्टादशदोषःस्यात्प्रातिकूल्यंकृतेभवेत् ॥ अनृतंपैशुनंतृष्णाप्रातिकू
ल्यंतमोरतिः ॥ २१ ॥ लोकद्वेषोऽभिमानश्चविवादःप्राणिपीडनं ॥

मन्यतमेकृतेदमस्यप्रतिकूलंभवेत् ॥ अनृतंअयथार्थवचनं १ पैशुनंपरदूषणवचनं २ तृष्णाविषयाशा ३ प्रातिकूल्यंसर्वेषांप्रति
कूलता ४ तमोऽज्ञानं ५ अरतिर्यथालाभेनासंतुष्टिः अथवारतिःस्त्रीसंभोगेष्वभिरतिः ॥ ६ ॥ २१ ॥ लोकद्वेषोलोकाना
मुद्वेगाचरणं ७ अभिमानःसर्वत्राप्रणतिभावः ८ विवादःजनकलहाचरणं ९ प्राणिपीडनंस्वदेहसंपूरणायप्राणिहिंसा १०
परिवादःसमक्षेपरदूषणाभिधानं ११ अतिवादोनिरर्थकोऽतिप्रलापः १२ परितापोव्यथादूःखचिंतनं १३ अक्षमाद्वंद्वासहिष्णु

प्रतिकूलंअश्रद्धाआलस्यादिच अकृतेउपवासव्रतादौप्रतिकूलंक्षुधाजिह्वालौल्यादिइदंद्वयमेकोदोषः ४ तमोऽज्ञानं ५ अरतिः
सत्क्रियानभिलाषः ६ ॥ २१ ॥ लोकद्वेषाभिमानौस्पष्टौ ८ विवादःकलहः ९ प्राणिपीडनंप्राणिहिंसा १० परिवादःदोषारोपणं ११ अतिवादः

पराक्रोशः १२ परितापः अतिदुःखित्वं १३ शेषंस्पष्टं॥२२॥असिद्धिरितिस्पष्टोर्थः॥२३॥ मदइति येषांवि पर्ययादमगुणत्वेनउक्तास्तएवसत्यादयो ष्टादश तथावक्ष्यमाणस्यषड्विधत्यागस्यचविपर्ययाःषट् तेचलक्ष्मीप्राप्तौहर्षः १ अप्रियेजातेव्यथा २ स्वीयेषुयाञ्चा ३ पात्रेष्वप्रदानं ४ सत्यधिकारेइष्टा ता १४ अधृतिः इंद्रियार्थेषुचपलता १५ ॥ २२ ॥ असिद्धिःधर्मज्ञानवैराग्याणां १६ पापकृत्यंप्रतिषिद्धाचरणं १७ हिंसाअ विहितहिंसा १८ इत्तिदमदोषाःप्रकीर्तिताः ॥ एतैरनृतादिभिर्दोषैर्विमुक्तोयोगुणःसदमइ तिसद्भिरुच्यते ॥ २३ ॥ इदानीं मददोषानाह ॥ मदइति ॥ एतेऽनृतादिहिंसांतायेदमदोषत्वेनस्थिताःस्मृताः ॥ तएतेविपर्ययाःस्मृताःसत्यादिरूपत्वेनस्मृताःमद

परिवादोऽतिवादःस्यात्परितापोऽक्षमाऽधृतिः ॥ २२ ॥ असिद्धिःपापकृत्यंचहिंसाचेतिप्रकीर्त्तिताः ॥
एतैर्दोषैर्विमुक्तोयःसदमःसद्भिरुच्यते ॥ २३ ॥ मदोऽष्टादशदोषःस्यात्त्यागोभवतिषड्विधः ॥
विपर्ययाःस्मृताएतेमददोषाउदाहृताः ॥ २४ ॥ श्रेयांस्तुषड्विधस्त्यागस्तृतीयोदुष्करोभवेत् ॥

दोषामदनाशकराउदाहृताः ॥ तएतेसत्यापैशुनातृष्णाप्रातिकूल्यातमोरतिलोकाद्वेषानभिमानाविवादाप्राणिहिंसाऽपरिवादान तिवादापरितापक्षमाधृतिसिद्धचपापकृत्याहिंसाइत्येतेमदनाशकराउदाहृताः ॥ २४ ॥ त्यागोभवतिषड्विधइत्युक्तंतत्राह ॥ श्रे यानिति ॥ श्रेयांस्तुषड्विधेषुत्यागेषुतृतीयत्यागोदुष्करःदुःखसंपाद्यः ॥ तृतीयेनत्यागेनदुःखमाध्यात्मिकादिभेदभिन्नंतरंत्ये पूर्तयोरकरणं ५ कामस्यात्यागःप्रमादश्च ६ एतेचतुर्विंशतिर्मददोषाः ॥ २४ ॥ श्रेयान्प्रशस्ततरःतृतीयोवक्ष्यमाणःकामत्यागःतस्मिन्काम त्यागेकृतेसतिभिन्नंभेदः भावेनिष्ठा द्वैतमितियावत् सएवदुःखं द्वितीयाद्वैभयंभवति यत्रान्यत्पश्यत्यन्यच्छृणोतितदल्पंअथयदल्पंतद्दुःखमित्या

दिश्रुतिभ्यः कामत्यागादेवसर्वदुःखनिवृत्तिरूपोमोक्षःसिद्धः तथाचश्रुतिः यदासर्वेप्रमुच्यंतेकामायेस्यहृदिस्थिताः अथमर्त्योमृतोभवत्यत्रब्रह्म
समश्नुतइति ॥ २५ ॥ त्यागमेवाहअर्हतइति अर्हतेयोग्याय १ इष्टंयागहोमादि आपूर्ततडागारामादि २ ॥ २६ ॥ षड्विधत्यागफलमाह

व ॥ तस्मिन्त्यागेकृतेसर्वंजितंभवत्येव ॥ २५ ॥ त्यागषट्कंदर्शयति ॥ अर्हतइतिसार्द्धेन ॥ अर्हतेदानयोग्याय ॥ याचमाना
यपुत्रान्वित्तंददातियत् ॥ तदेवत्यागद्वयंषण्णांमध्येप्रथमं ॥ इष्टापूर्त्तंद्वितीयंस्यात् ॥ इष्टंश्रौतेकर्मणियद्दानं ॥ पूर्त्तंस्मार्त्तेकर्म
णि ॥ इष्टं देवेभ्योदत्तंपूर्तंपितृभ्यइतिकेचित् ॥ नित्यंवैराग्ययोगतःविशुद्धसत्वस्थानित्यत्वादिदोषदर्शिनोविरक्ततयाधनादिप
रित्यागःकामःत्यागश्चेतितृतीयः ॥ षण्णांयत्द्विकत्रयंतेषुतृतीयंद्विकरूपत्यागइत्यभिप्रायः ॥ २६ ॥ किमेभिर्भवतीत्यतआह

तेनदुःखंतरंत्येवभिन्नंतस्मिन्जितंकृते ॥ २५ ॥ अर्हतेयाचमानायपुत्रान्वित्तंददातियत् ॥
इष्टापूर्तंद्वितीयंस्यान्नित्यंवैराग्ययोगतः ॥ कामस्त्यागश्चराजेंद्रसतृतीयइतिस्मृतः ॥ २६ ॥
अप्रमादीभवेदेतैःसचाप्यष्टगुणोमहान् ॥ २७ ॥ सत्यंध्यानंसमाधानंचोद्यंवैराग्यमेवच ॥

॥ अप्रमादीति ॥ यएतैःषड्भिस्त्यागैःसमन्वितःसोऽप्रमादीभवेत् ॥ सअप्रमादोष्टगुणःअष्टभिर्गुणैःसमन्वितोभवति ॥२७॥
केतेतान्दर्शयति ॥ सत्यमिति ॥ सत्यंयथार्थभाषणं १ ध्यानंचेतसःकस्मिंश्चित्शुभाश्रयेमंडलपुरुषादौतैलधारावत्संततावि‍च्छे
दिनीप्रवृत्तिः २ समाधानंप्रणवेनविश्वाद्युपसंहारंकृत्वास्वाभाविकचित्सदानंदाद्वितीयब्रह्मात्मनावस्थानं ३ चोद्यंकोहंकस्यकुतो
वेति ४ वैराग्यंदृष्टानुश्रविकविषयवितृष्णता ५ अस्तेयमचौर्यंआत्मनोद्रव्यस्यवा ॥ आत्मचौर्यमुक्तं ॥ योन्यथासंतमात्मा

अप्रमादीति सचअप्रमादश्च ॥ २७ ॥ सत्यंयथार्थवचनं १ ध्यानंमूर्तेरीश्वरस्यआत्मनोवाऽनुसंधानं २ समाधानंसंप्रज्ञातासंप्रज्ञातभेदेनद्विवि
धःसमाधिः ३ चोद्यंतर्कःयेनसमाधिफलेसार्वकाम्यादौदोषमुन्नयंति ४ वैराग्यमुपरमः५ अस्तेयंपरस्वापहरणाभावः६ ब्रह्मचर्यंस्त्रीसंगराहित्यं ७

असंग्रहोनिष्परिग्रहता ८॥ २८॥ उक्तमनुवदत्यप्रमादप्रतियोगिनंप्रमादंवक्तुं एवमिति ॥२९॥ दमत्यागाप्रमादानुक्त्वातेषांसत्यमुखत्वंप्रागुक्तं नमन्यथाप्रतिपद्यते ॥ किंतेननकृतंपापंचोरेणात्मापहारिणेत्यादि ६ ब्रह्मचर्यमष्टांगमैथुनत्यागः ॥ तथाचोक्तं ॥ दर्शनंस्पर्श नंकेलिःकीर्तनंगुह्यभाषणं ॥ संकल्पोध्यवसायश्चक्रियानिर्वृतिरेवच ॥ एतन्मैथुनमष्टांगंप्रवदंतिमनीषिणः ॥ विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणमिति ७ असंग्रहोऽपरिग्रहः पुत्रदारक्षेत्रगृहादीनां ८ एतत्परिपालयेत् ॥२८॥ दोषान्वर्जयेदित्याह॥ एवमिति ॥ दमोष्टादशदोषःस्यादितियेदोषाउक्तास्तान्वर्जयेदिति॥ कस्मादित्यत्राह ॥ दोषत्यागेअप्रमादःस्यात्तेषुदोषेषुत्यक्तेषुप्र

अस्तेयंब्रह्मचर्यंचतथाऽसंग्रहमेवच ॥ २८ ॥ एवंदोषादमस्योक्ता स्तान्दोषान्परिवर्जयेत् ॥ दोषत्यागोऽप्रमादःस्यात्सचाप्यष्टगुणो मतः ॥ २९ ॥ सत्यात्माभवराजेंद्रसत्येलोकाःप्रतिष्ठिताः ॥ तां स्तुसत्यमुखानाहुःसत्येह्यमृतमाहितं ॥ ३० ॥ निवृत्तेनैवदोषेण तपोव्रतमिहाचरेत् ॥ एतद्धातृकृतंवृत्तंसत्यमेवसतांव्रतं ॥ ३१ ॥

मादादिनस्यादित्यर्थः ॥ सोप्यप्रमादोऽष्टगुणोमतः सत्यंध्यानमित्यादीनापूर्वमेवोपदिष्टमित्यर्थः ॥ २९ ॥ इदानींसत्यस्तुतिः क्रियते ॥ सत्यात्मेति ॥ सत्यात्मासत्यरूपोभवेति ॥ हेराजेंद्रसत्येलोकाः प्रतिष्ठिताः ॥ अमृतंमोक्षः ॥३०॥ निवृत्तेनेति ॥ निवृ त्तेनैवदोषेणक्रोधादयइत्यादिनापूर्वोक्तदोषरहितः तपोव्रतमिहाचरेत् ॥ एतद्धात्रापरमेश्वरेणकृतंवृत्तंसत्यमेवसतांपरंव्रतं ॥३१॥
विवृणोति सत्यात्मेति सत्येआत्माचित्तंयस्यसतथा तान्दमत्यागाप्रमादान् ॥३०॥ दोषनिवृत्त्यैवतपःसिद्धिर्धात्राकृतेत्याह निवृत्तेनैवेति ॥३१॥

प्रश्नव्याख्यानमुपसंहरति दोषैरिति ॥ ३२ ॥ ३३ ॥ पंचभ्यइंद्रियेभ्यःषष्ठान्मनसश्चस्वस्वविषयेरागद्वेषोत्थाःषट्प्रमादाः अतीतेनष्ट पुत्रशोकादिजःसप्तमःअनागतेपुत्रकामस्यतदभावेयःक्लेशःसोष्टमःप्रमादः एतेभ्यःप्रमादेभ्योमुक्तश्चेत्ससुखीभवेत् ॥ ३४ ॥ एवंविद्यासा

इदानींकथंसमृद्धमित्यादिनोपक्रांतंप्रकरणार्थमुपसंहरति॥दोषैरिति॥दोषैरेतैःक्रोधादयइत्यादिनापूर्वोक्तैर्विमुक्तंगुणैरेतैःज्ञानादिभिः समान्वितंयत्एतत्समृद्धमप्यृद्धंतपोभवतिकेवलं॥३२॥ किंबहुना॥यन्मामिति ॥हेराजन्यन्मांपृच्छसितत्संक्षेपात्समासतोब्रवी मितेएतत्पापहरंशुद्धंफलाभिकांक्षारहितंतपोव्रतंजन्ममृत्युजरापहंवक्ष्यमाणं॥३३॥एतत्पापहरंशुद्धमित्युक्तं॥किंतदितिचेत्तत्राह॥

दोषैरेतैर्विमुक्तंतुगुणैरेतैःसमन्वितं ॥ एतत्समृद्धमप्यृद्धंतपोभवति
केवलं॥ ३२॥ यन्मांपृच्छसिराजेंद्रसंक्षेपात्प्रब्रवीमिते ॥ एतत्पाप
हरंशुद्धंजन्ममृत्युजरापहं ॥ ३३ ॥ इंद्रियेभ्यश्चपंचभ्योमनसश्चै
वभारत ॥ अतीतानागतेभ्यश्चमुक्तश्चेत्ससुखीभवेत् ॥ ३४ ॥
धृतराष्ट्रउवाच ॥ आख्यानपंचमैर्वेदैर्भूयिष्ठंकथ्यतेजनः ॥

इंद्रियेभ्यइति ॥ हेभारतसविषयेभ्यःपंचभ्यःइंद्रियेभ्योवर्तमानेभ्योमनसश्चतथाऽतीतेभ्योऽनागतेभ्यश्चमुक्तश्चेत्ससुखीभवेत्मुक्त एवभवतीत्यर्थः ॥ ३४ ॥ एवमुक्तेप्राहधृतराष्ट्रः ॥ आख्यानेति ॥ आख्यानंपुराणंपंचमंयेषांवेदानांतेआख्यानपंचमाः॥ श्रूय तेचछांदोग्ये ॥ इतिहासपुराणंचपंचमोवेदइति ॥ तैराख्यानपंचमैर्वेदैःभूयिष्ठंअत्यर्थंकथ्यतेश्लाघ्यतेबहुमन्यते ॥ सर्वस्मादधि

धनान्यधिगम्यअध्ययनगृहीताद्वेदादधिगतवेद्यानामनेकत्वंमन्वानः किंतद्वेद्यंश्रेष्ठमितिपृच्छति आख्यानेति आख्यानंइतिहासपुराणादिपंचमंये षुतैर्वेदैः सर्वंखल्विदंब्रह्म ब्रह्मैवेदंविश्वं पुरुषएवेदंसर्वमित्यादिभिर्भूयिष्ठंनामादिप्रपंचादधिकतमंभूमाख्यंपरंब्रह्मतदेवजनः स्थावरजंगमरूपंज

गदितिकथ्यते अन्येशाखिनःपुनश्चतुर्वेदाःचत्वारिवेदयंतितेतथाचत्वारःपुरुषाइति बाह्यःशरीरपुरुषश्छंदःपुरुषोवेदपुरुषोमहापुरुषइति छंदो गायत्र्यादिनियताक्षरपादंतत्रयजुःसाम्नोरप्युपलक्षणं वेदःकर्मचोदनात्मकंब्राह्मणं तथात्रिवेदाःत्रीन्क्षरमक्षरमुत्तमंचेतिपुरुषंवेदयंतेत्रिवेदाः क्षरंप्रधानं अमृताक्षरंहक्षरात्मानावीशतेदेवएकइति अमृतोजीवःकूटस्थःसोऽक्षरं सुलोपआर्षः ईशतेईष्टे क्षरःसर्वाणिभूतानिकूटस्थोऽक्षरउच्यते उत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतइति ॥३५॥ तथाद्विवेदाः द्वेब्रह्मणीवेदितव्येशब्दब्रह्मपरंचयदितिवाच्यवाचकयोरभेदेनशब्दब्रह्मशब्देनात्रकृत्स्नो नामरूपात्मकःप्रपंचउच्यते परंचतदतीतमितिद्वयमपिवेद्यत्वेनवदंति एकवेदाःएकधैवानुद्रष्टव्यंनेहनानास्तिकिंचनेत्यादयएकमेववेद्यंवेदयंति अनृचश्चऋच्यतेस्तूयतेइतिऋक्ईश्वरःसपृथक्त्वेननास्तियेषांतेऽ नृचःब्रह्माद्वैतवादिनः एकवेदानांव्युत्थानकालेद्वैतमस्तिसमाधौतुबाधितंतद्भवति कोहमितिकथ्यतेइतिकेचित्पठंति॥ आख्यानपंचमैर्वेदैःकश्चिज्जनःपंचमवेदीकथ्यते॥तथाचान्येचतुर्वेदास्त्रिवेदाः ॥३५॥ अपरे

तथाचान्येचतुर्वेदास्त्रिवेदाश्चतथापरे ॥ ३५ ॥ द्विवेदाश्चैकवेदाश्चअनृचश्चतथापरे ॥ एतेषुमेऽधिकंब्रूहियमहंवेदब्राह्मणं ॥ ३६ ॥

द्विवेदाः एकवेदाश्चअनृचश्चतथापरेएतेषुमनुष्येषुअधिकंश्रेष्ठंब्रूहियमहंब्राह्मणंवेदाविद्यां ॥३६॥ एवंस्वाभाविकचित्सदानंदाद्वि अनृचांतुअवस्थाद्वयेपिद्वैताभावस्तुल्यइतिभेदः एतेषांषण्णांमध्येअधिकं ब्रूहियमहंवेदजानीयांब्राह्मणंब्रह्मविदमित्यर्थः अत्रभूयिष्ठंजनइतिप्रथमःसविशेषाद्वैतपक्षः द्वितीयोनिरीश्वरपक्षः सांख्यानांमीमांसकानांच त्रिवेदास्तुपातंजलाजीवेशजगतांभेदंवदंतःद्विवेदास्त्वौडुलोमाःकार्यात्मनाभेदंकारणात्मनाअभेदंचसत्यमेववदंतः यथाकटकमुकुटाद्यात्मनाभेदोपिसत्यःकनकात्मनाऽभेदोपिसत्यएवेति एकवेदानामपिकिंचिद्बाधयोग्यंसत्त्वासत्त्वाभ्यामनिर्वचनीयंद्वैतमस्त्येवव्यावहारिकंप्रातिभासिकात्सद्योबाध्यात्रज्जूरगादेर्विलक्षणंयावन्मोक्षमबाध्यंअनृचांतुदृष्टिसृष्टिवादिनांयथारज्ज्वामुरगःस्रक्चकल्पिताएवमात्मनिजाग्रत्स्वप्नौसमसत्ताकौइतिभेदःतत्राध्यारोपापवादाभ्यांनिष्प्रपंचंप्रपंच्यतइतिन्यायेनआद्यंपक्षचतुष्टयंव्यवहारस्यपारमार्थिकत्वपरमध्यारोपदृष्ट्योपन्यस्तंअंत्यः पक्षोपवाददृष्ट्याव्यवहारापलापेनएकवेदपक्षस्तुव्यामिश्रदृष्ट्याऽनिर्वचनीया

ख्यया एवमेवदृष्टित्रयमाश्रित्यशास्त्रमपिप्रवृत्तं आत्मकृतेःपरिणामादिति अध्यारोपकालेपरिणामदृष्टिःसूचिता ब्रह्मैवकनककुंडलन्यायेनजगदाकारेणपरिणतं तथाचश्रुतिः तदात्मानꣳस्वयमकुरुत सत्यंचानृतंचसत्यमभवत् सत्यंव्यावहारिकंजाग्रद्रज्ज्वादि अनृतंप्रातिभासिकंस्वप्नरज्जूरगादि एतदुभयात्मकंसत्यंकालत्रयाबाध्यंब्रह्मैवप्राप्तमितिश्रुत्यर्थः तथाआत्मनिचैवंविचित्राश्चहीतिस्वप्नकालेआत्मनिजाग्रत्कालेमायेंद्रजालमरीचिकोदकादयोहिप्रसिद्धतराःसृष्टयोभवंति विचित्राश्चताः नचताःनसंतीतिवक्तुंशक्यं अनुभूयमानत्वात्नापिसंतीतिज्ञानेनसद्योबाधात्एवंब्रह्मण्यपिविचित्राऽनिर्वचनीयासृष्टिरस्तीतिसूत्रार्थः तथाचास्यजगतोऽनिर्वचनीयत्वंश्रुतिराह कोअद्धावेदकइहप्रवोचत्कुतआजाताकुतइयंविसृष्टिरितितंकोपिनवेदनकोपिप्रावोचदितिश्रुत्यर्थः सेयंव्यामिश्रदृष्टिः अपवाददृष्टिस्तुआहचतन्मात्रमितिसूचितासयथासैंधतीयब्रह्मात्मनावस्थितःसएवब्राह्मणइतिदर्शयिष्यन्तव्यतिरिक्तस्यसर्वस्यतदज्ञानमूलत्वंदर्शयति ॥ एकवेदस्येति॥एकस्यवेदस्य

सनत्सुजातउवाच ॥ एकवेदस्यचाज्ञानाद्वेदास्तेबहवोभवन् ॥

वेद्यमिदंरूपंअनिदंवेदरूपंवेदनंवेदःज्ञानं ॥ एकस्याद्वितीयस्यसंविद्रूपस्येत्यर्थः ॥ तस्यैकवेदस्यब्राह्मणोऽनवगमात् ॥ ऋगादवखिल्यउदकेप्रास्तउदकमेवानुविलीयेतसयथासैंधवघनोऽनंतरोऽबाह्यः कृत्स्नोरसघनएवंवाअरेयमात्माकृत्स्नःप्रज्ञानघनइतिश्रुत्याचदर्शिता यथाजलेप्रास्तःसैंधवखिल्यःस्वोपादानंउदकंजलेलीनमनुस्वयमपिलीयते अन्यथाकरकालयेइवजलेपरिमाणाधिक्यंस्यात् अतःसःअंतरंकारणंबाह्यंघनीभावःतदुभयवर्जितःकेवलरसतन्मात्रात्मनाजलेऽभिव्यक्तोदृश्यते एवमयंप्रपंचःकार्यकारणोभयस्वरूपहीनः समाधौकेवलप्रज्ञानघनोभिव्यज्यतेइतिश्रुत्यर्थःअनेनदृष्टित्रयेणजनबोधार्थंशास्त्रंप्रवृत्तंयथोक्तंसंक्षेपशारीरके आरोपदृष्टिरपवादकदृष्टिरेवंव्यामिश्रदृष्टिरितिदृष्टिविभागमेनंसंगृह्यसूत्रकृदयंपुरुषंमुमुक्षुंसम्यक्प्रबोधयितुमुत्सहतेक्रमेणेत्यादिना श्रुतिवचांसिमुनिस्मरणानिचद्वयविशारदगीरपिसर्वशः त्रयमपेक्ष्यदृशांत्रितयंविनानहिघटामुपयांतिकदाचनेत्यंतेन॥ ३६ ॥ एवमनेकेषुपक्षेषूपस्थापितेषुसिद्धांतमाह एकस्येति ब्रह्मैवएकंवेद्यंतच्चसत्यंकालत्रयेप्यबाध्यंतस्यअज्ञानात्बहूनिवेद्यानिउपास्यानिअब्रह्मभूतानिकृतानिकल्पितानिवेदे सत्यप्रतिपत्त्यर्थं तेषामब्रह्मत्वंवेदएवाह तदेवब्रह्मत्वंविद्धिनेदं

यदिदमुपासतइति तस्मिंश्चसत्येब्रह्मणिकश्चिदेवअवस्थितःब्रह्मलाभोऽतिदुर्घटइत्यर्थःश्रुतिरप्यज्ञानकार्यत्वंजगतआह तुच्छेनाभ्वपिहितंयदासीत् तमसस्तन्महिनाजायतैकामिति तुच्छेनरज्जूरगादिवदध्यस्तेनामिथ्याभूतेनतमसाआभुसर्वव्यापकंब्रह्मआपिहितंआच्छादितंयत्आसीत्तत्एकमेवसत्तमसःअज्ञानस्य तपसइतिपाठेआलोचनस्यसंकल्पमात्रस्यमहिनामाहात्म्येनअजायतप्रपंचाकारेणआविर्बभूव यथारज्जुरज्ञानाद्य

योवेदाबहवोऽभवन् ॥ अत्रऋगादिवेदास्तत्प्रतिपत्त्यर्थंविचारंकुर्वंतीतिवेदाख्यामवामुयुः ॥ अथवासद्भावंसाधयंतीतिवेदाः ॥ विदंतिवेदनहेतुभूताइतिवावेदाः ॥ अथवाब्रह्माधीनंपरमात्मानंलभंतइतिवेदाः ॥ अथवाब्रह्मादीनामात्मानंलभंतइतिवेदाः ॥ ब्रह्मणआवृतस्यलाभहेतवइतिवावेदाः ॥ ब्रह्मणआत्मतयालाभहेतवइतिवावेदाः ॥ विदविचारणे ॥ विदसत्तायां ॥ विदज्ञाने॥ विदलाभे ॥ एतेषांधातूनांविषयेवर्त्ततेयस्मात्ततोवेदाइत्युक्ताः ॥ सएकोवेदः ॥ कइतिचेत्॥सत्यंज्ञानमनंतंब्रह्म ॥ एकमेवाद्वि

सत्यस्यैकस्यराजेंद्रसत्येकश्चिदवस्थितः ॥ ३७ ॥ सत्यात्प्रच्यवमानानां
संकल्पावितथाभवन् ॥ ततःकर्मप्रतायेतसत्यस्यानवधारणात् ॥ ३८ ॥

तीयमित्यस्यश्रुतिप्रतिपाद्यस्यएकस्यब्रह्मणःसिद्धत्वान्नचाशंकेत्यर्थःतत्सत्यस्यवेदस्वरूपस्यब्रह्मणोनवगमात् वेदाबहवोख्याताः सर्वेवेदास्तदर्थदर्शनहेतवः ॥ ३७ ॥ हेराजेंद्रत्वंपुनःकश्चित्सत्येस्थितइति ॥ भूयोमेशृणु॥सत्यादिति॥ सत्यादिलक्षणाद्ब्रह्मणः प्रच्यवमाणानांसंकल्पावितथाअभवन् ॥ व्यर्थाःभवंति । स्वाभाविकसत्यसंकल्पादयोनसिध्यंतीत्यर्थः ॥ ततःकर्मयज्ञादिप्रतायेतविस्तृतंभवेदित्यर्थः ॥ तदेतत्सर्वंसत्यस्यसत्यादिलक्षणस्यब्रह्मणोऽनवधारणात्अनवगमात् ॥ आत्मज्ञाननिमित्तत्वात्संसारतासर्पाकारेणाविर्भवतितद्वदितिश्रुत्यर्थः ॥ ३७ ॥ सत्यादिति तथाभवेत्परमानंदात्प्रच्युतस्यक्षुद्रानंदविषयोभिलाषोभवेत्ततश्चासौयज्ञोज्योतिष्टोमादिःप्रतायेतसंतन्यते सत्यस्यवेदवचनस्यज्योतिष्टोमेनस्वर्गकामोयजेतेत्यादेः अवधारणातप्रामाण्यनिश्चयात्संकल्पोवितथोभवेदितिपाठेसत्यज्ञस्यैवसत्यसंकल्पत्वंअन्यस्यतुसंकल्पोवंध्यइत्यर्थः सनत्पाठेयज्ञोपिसत्यस्यानवधारणादापरोक्ष्येणअनिश्चयादेवप्रवर्ततेज्ञातेतुसत्ये

एतद्बुध्वाबुद्धिमान्स्यात्कृतकृत्यश्चभारतोति कृतकृत्यत्वमेवस्मर्यते ॥ ३८॥ एतदेवस्पष्टयति विंद्यादितिविंद्यादित्यर्द्धेनापरोक्षज्ञानस्यव्यावृत्तिरि हउच्यते॥उक्तमेवोपसंहरति सत्यात्प्रत्यगद्दयानंदात् तथाचश्रुतिः योवाएतदक्षरंगार्गीविदित्वास्माल्लोकात्प्रैतिसब्राह्मणइत्यपरोक्षज्ञानिनोब्राह्म णत्वमुक्त्वाऽर्थादितरस्याब्राह्मणत्वंदर्शयाति॥३९॥छंदांसिनामेति द्विपदांमनुष्याणांमध्येवरिष्ठ तत्रसत्येब्रह्मणिविषयेछंदांसिवेदाः स्वच्छंदयोगेन

स्ययावत्परमात्मानंआत्मत्वेनसाक्षान्नजानातितावदयंतापत्रयाभिभूतोमकरादिभिरिवरागादिभिरितस्ततः समाकृष्यमाणइत स्ततोमुह्यमानोऽसत्यसंकल्पः स्वर्गपश्वान्नादिहेयसाधनेषुवर्त्ततइत्यर्थः ॥ ३८ ॥ इदानींब्राह्मणलक्षणमाह ॥ विंद्यादिति ॥ बहुपठंतमाख्यानपंचमवेदाध्यायिनं ॥ बहुवागीतिविंद्यात्नसाक्षाद्ब्राह्मणमिति ॥ कस्तर्हिमुख्योब्राह्मणइतिचेत्॥ यएतत्सत्या दिलक्षणान्नापैतिनक्षरतिचित्सदानंदाद्वितियिब्रह्मरूपेणावतिष्ठतेसएवब्राह्मणस्त्वयाज्ञेयः ॥ नेतरोयः सत्यात्च्युतः अकृ

विंद्याद्बहुपठंतंतुबहुवागितिब्राह्मणं ॥ यएवसत्यान्नापैतिसज्ञेयोब्राह्मणस्त्वया॥३९॥ छंदांसिनामद्वि
पदांवरिष्टस्वछंदयोगेनभवंतितत्र ॥ छंदोविदस्तेनचतानधीत्यगताहिवेदस्यनवेद्यमार्याः ॥ ४० ॥

तार्थःसन्कर्मणिप्रवर्त्तते ॥ तथाचब्रह्मविदमेवब्राह्मणंदर्शयातिश्रुतिः ॥ मौनंचामौनंचानिर्विंद्याथब्राह्मणइतिविपापोविज्वरो विचिकित्सोब्राह्मणोभवतीतिच ॥३९॥ भवेदेतदेवंयदितदेवब्रह्मसिद्धेत् ॥ नचसिद्ध्यत्यन्यपरत्वाद्वेदस्येतितत्राह ॥ छंदांसी ति ॥ हेद्विपदांवरिष्टछंदासिवेदाःस्वछंदयोगेनस्वछंदतास्वाधीनतायथाकाममित्यर्थः॥ तत्रैवयरमात्मनिप्रमाणंभवति ॥ श्रूयतेच सर्वेवेदायत्पदमामनंति ॥ वेदैश्चसवैरहमेववेद्यइतिच ॥ पुरुषार्थपर्यवसायित्वाद्वेदस्यतद्व्यतिरिक्तस्यअनित्याशुचिदुःखानुविद्धत्वे ॥२७॥

स्वातंत्र्यसंबंधेनैवभवंतिकर्मकांडार्थज्ञानवत्ब्रह्मकांडार्थज्ञानंनमध्येऽनुष्ठानांतरमपेक्षते तथाहि तद्धैतत्पश्यन्नृषिर्वामदेवःप्रतिपेदेहंमनुरभवंसूर्य श्चेतिश्रुत्यादर्शनसार्वात्म्ययोर्मध्येतिष्ठन्गायतीत्यादौतिष्ठतिगायत्योर्मध्येइवकार्यांतरंवार्यते तेनचज्ञातेनसत्येन चकारएवकारार्थे तेनैवेत्यर्थः छं दोविदोभवंतिनकर्ममात्रज्ञानेन तान्छंदोज्ञान्अधीत्यप्राप्यआर्याःवेदस्यवेद्यंवेदनीयंब्रह्मनगताइतिनअपितुगताःप्राप्ताएवेत्यर्थः एतेनतद्विज्ञाना

58

र्थसगुरुमेवाभिगच्छेदित्यस्याःश्रुतेरर्थोदर्शितः ॥ ४० ॥ तथापिब्रह्मणोदुर्ज्ञेयत्वमाह नेति वेदानांवेद्यानामहंकारादीनामचेतनानांमध्येकश्चिद्वे दितानास्ति अतोहेतोर्वेद्येनचेतसावेदंवेदबोध्यमात्मानंनाविदुः नापिवेद्यमनात्मानमपिनविदुः आत्माऽनात्माचनजडस्यविषयावित्यर्थः ननु जाड्याधीवृत्त्याआत्माज्ञायतएवदृश्यतेत्वग्र्ययाबुद्ध्येतिश्रुतेरित्याशंक्याह वेदमात्मानंयोवेदसएववेद्यमनात्मानंसर्वंवेद आत्मप्रभवत्वात्सर्वस्य

नपुरुषार्थत्वाभावात्तत्स्वरूपत्वतत्साधकत्वतत्प्रतिपादकत्वेनवेदानांप्रमाणत्वमित्यर्थः ॥ यस्माद्वेदाःस्वच्छंदयोगेनतत्रैवपरमात्म निप्रमाणंभवंति॥ तेनचहेतुनातान्वेदानधीत्यावगम्यवेदांतश्रवणादिकारणंकृत्वागताःप्राप्ताः वेदस्यसंविद्रूपस्यपरमात्मनःस्वरूपं नवेद्यंप्रपंचमार्याःपंडिताःब्रह्मविदः ॥ ४० ॥ एवंतर्हिवेदवेद्यत्वेअन्यदेवतद्विदितादथोऽविदितात् ॥ यतोवाचोनिवर्ततइत्यादि विरोधःप्रसज्येतेत्यत्राह ॥ नवेदानामिति ॥ नवेदानामृगादीनांमध्येकश्चिदपिवेदःपरमात्मनोवाचामगोचरस्यसंविद्रूपस्यवेदि

नवेदानांवेदिताकश्चिदस्तिवेद्येनवेदंनविदुर्नवेद्यं ॥
योवेदवेदंसचवेदवेद्यंयोवेदवेद्यंनसवेदसत्यं ॥ ४१ ॥

तास्ति ॥ कस्माद्यस्माद्वेद्येनजडरूपेणवेदंसंविद्रूपंनविदुः ॥ नवेद्यंप्रपंचमपिनविदुः ॥ संविदधीनत्वात्सर्वसिद्धेःयस्मात्संविदधी नासर्वसिद्धिस्तस्माद्योवेदंसंविद्रूपंपरमात्मानंवेदजानातिसचवेदवेद्यमिदंसर्वं ॥ तथाचश्रुतिः ॥ आत्मावारेद्रष्टव्यःश्रोतव्यो मंतव्योनिदिध्यासितव्यः ॥ आत्मनोवाअरेदर्शनेनश्रवणेनमत्याविज्ञानेनेदंसर्वंविदितमिति ॥ एकंविज्ञानेनसर्वंविज्ञातमितिच योवेद्यमिदंरूपंवेदजानातिससत्यंसत्यादिलक्षणंपरमात्मानंनवेद ॥ ४१ ॥ नन्वेवंतर्हिवेद्येनवेदंनविदुःनवेद्यमितिवदतो यस्तुबहिर्मुखोवेद्यमनात्मानंवेदससत्यंब्रह्मनवेद तथाचश्रुतीभवतः आत्मनोवाअरेदर्शनेनश्रवणेनमत्याविज्ञानेनेदंसर्वंविदितं पराञ्चिखानिव्यतृण त्स्वयंभूस्तस्मात्पराङ्पश्यतिनांतरात्मन्निति व्यतृणत्हिंसितवान् ॥४१॥ किंच यश्चिदात्मासर्वेषांप्रत्यक्त्वेनप्रसिद्धः वेदान्वेदयंतितेवेदाःतान्

प्रमाणानिवेदसएववेद्यंप्रमेयमपिवेदनतुतानिवेद्यंविदुर्जडत्वात् तंचप्राणस्यप्राणमुतचक्षुषश्चक्षुः श्रोत्रस्यश्रोत्रंमनसोयेमनोविदुरितिप्राणादीनांप्रव र्तकत्वेनप्रसिद्धंवेदाःप्रमाणानिवेदविदःप्रमातारश्चनविदुः यतोवाचोनिवर्तंतेअप्राप्यमनसासहेतितस्यवाङ्मनसातीतत्वश्रुतेः यद्यप्येवंतथापिवेदं वेदितारमात्मानंवेदेनैवप्रमाणेनअहंब्रह्मास्मीत्यादिनाविदंतिजानंति केते येब्राह्मणाःवेदविदोवेदपाठतोऽर्थतोऽनुष्ठानतश्चविदंतितेवेदविदः अ-

अनात्मविदःप्रपंचासिद्धिरेवेत्युक्तंभवतीत्याशंक्याह ॥ योवेदेति ॥ योवेदजानातिऋगादन्विदान्सचवेदवेद्यंसोप्यनात्मविदवि च्छिन्नेनसंवेदनेनवेद्यंप्रपंचंवेद ॥ नन्वेवंचेत्तर्हिवेदवित्परमात्मानंविजानीयादित्याशंक्याह ॥ नतंपरमात्मानंवाचामगोचरंविदुर्वे दविदः ॥ नवेदावेदाअपिनतंविदुः नतंविषयीकुर्वंतीत्यर्थः कथंचिल्लक्षणया बोधयंतीतिभावः ॥ नन्वेवंतर्हिकथमौपनिषदंब्रह्म स्यान्नेत्याह तथापिवेदेनविदंतिवेदंयद्यपिवागाद्यविषयंब्रह्मतथापिवेदेनऋगादिनाविदंतिजानंतिवेदंसंविद्रूपंपरमात्मानं ॥ केते

योवेदवेदान्सचवेदवेद्यंनतंविदुर्वेदाविदोनवेदाः ॥ तथा
पिवेदेनविदंतिवेदंयेब्राह्मणावेदविदोभवंति॥४२॥धामां
शभागस्यतथाहिवेदायथाद्यशाखाहिमहीरुहस्य ॥

येब्राह्मणावेदविदोभवंति ॥ वेदानांउपनिषद्वाक्यानां उपक्रमोपसंहारावभ्यासापूर्वताफलार्थवादोपपत्तिरूपषड्विधलिंगेनजहद जहल्लक्षणयातत्त्वमस्यहंब्रह्मास्म्ययमात्माब्रह्मेत्यादिनासंवेदस्यसंविद्रूपस्यपरमात्मनःप्रतिपादनप्रकारंजानंतीत्यर्थः ॥ ४२ ॥ कथंतर्हिअविषयमेवब्रह्मवेदाःप्रतिपादयंतीत्याशंक्याह ॥धामेति॥ धामांशभागस्य ॥ रात्रिधामश्चंद्रइतिश्रुतेः॥ चंद्रांशभागस्यप्र तिपच्चंद्रकलादर्शनेयथामहीरुहस्यवृक्षस्यशाखाहेतुर्भवति ॥ तथाहि वेदास्तस्यैवपरमात्मनःस्वरूपभूतसंवेदनेनित्येऽविनाशिन्य ध्ययनयज्ञादिनासंस्कृतचित्ताएववाक्यादात्मानंलक्षणयाजानंतिनत्वन्येइत्यर्थः ॥४२ ॥ इदमेवदृष्टांतेनप्रतिपादयति॥धामांशेति ॥धामतेजःतन्म यतेयाःअंशायस्यसतेजोमयोऽर्थाच्चंद्रःतस्यभागःकलाप्रतिपद्भूतास्तस्यसंवेदनेज्ञापनेयथा[illegible]सिद्धंमहीरुहस्यशाखाउपादीयते तथाहितथैव

वेदाःपरमात्मनःसंवेदनेऽर्थेपरमपुरुषार्थरूपेसत्येसर्वथाप्यबाध्येवेदाउपादयितइतिआमनंति तंत्वौपनिषदंपुरुषंपृच्छामीत्यौपनिषदत्वविशेषणात् वाचामगोचरत्वश्रुतेश्चसोयंदेवदत्तइत्यादिवाक्यवत्तत्त्वमस्यादिवाक्यमपिलक्षणयास्वार्थप्रमापयत्येवेत्यर्थः ॥ ४३ ॥ एवंगुरूपसदनपूर्वकंवाक्यार्थप्रतिपत्त्युपायमुक्त्वागुरुलक्षणान्याह॥अभीति॥ब्राह्मणंब्रह्मविदंलक्षणतोभिजानामिलक्षणमेवाह आख्यातारंउपक्रमोपसंहारैकरूप्यादिष

र्थेपरमपुरुषार्थरूपेपरमानंदस्वरूपेहेतवोभवंति ॥ मुनयःनपुनःसाक्षाद्वाचामगोचरंपरमात्मानंप्रतिपादयंत्येवमामनंति ॥ ४३ ॥ यएवंवेदानांवेदरूपात्मप्रतिपादनप्रकारमवगम्यव्याचष्टे ॥ सोपिब्राह्मणइत्याह ॥ अभीति ॥ एवंवेदप्रतिपादनप्रकारंयोव्याचष्टे तमाख्यातारंविचक्षणंब्राह्मणमभिजानामि ॥ यस्तुबाल्यपांडित्यादिकंनिर्विद्यावस्थितमेवब्राह्मणंब्रुवेइतिश्रुतिः॥ तथाहिब्राह्मणःपांडित्यंनिर्विद्यबाल्येनतिष्ठासेतथाबाल्यंचपांडित्यंचनिर्विद्याथमुनिर्भवति मौनंचामौनंचनिर्विद्याथब्राह्मणइति॥ ननुकथमु

संवेदनेचैवयथामनंतितास्मिन्हिनित्येपरमात्मनोर्थे ॥४३॥ अभि
जानामिब्राह्मणमाख्यातारंविचक्षणं ॥ परंहितत्परंब्रह्मजानात्येव
चब्राह्मणः ॥ ४४ ॥ नास्यपर्येषणगंच्छेत्प्रत्यर्थिषुकथंचन ॥

च्यतेब्रह्माभिजानामिब्राह्मणमाख्यातारंविचक्षणमितितत्राह ॥वेदानांवेदप्रतिपादनंयथोक्तंयोविजानातिपरंहितत्परंब्रह्मजानात्येवअतःसब्राह्मणोभवतियोहिपांडित्यंनिर्विद्यस्थितःसक्षिप्रंबाल्यादिकंनिर्विद्यब्राह्मणोभवतीत्यभिप्रायः ॥४४ ॥ यस्मात्सत्यनिष्ठस्यैवब्राह्मणस्यप्रसिद्धिस्तस्माद्विषयपरोनभवेदित्याह ॥ नास्येति ॥ नास्यजगतःपर्येषणंगच्छेद्विषयान्वेषणपरोनभवेदित्यर्थः ॥

द्विधतात्पर्यलिंगानुसारेणवाक्यार्थवर्णनकुशलं विचक्षणंश्रुतार्थस्ययुक्तिभिरनुचिंतनेसमर्थं निदिध्यासनपरिपाकेनापरोक्षसाक्षात्कारबलात् ४४ एतदेवाह॥नास्येति॥ प्रत्यर्थिषुआत्मत्वेनप्रथमानेष्वनात्मसुपंचसुकोशेषुपर्येषणमन्वेषणंनगच्छेन्नकुर्यादित्यर्थःकथंचनेत्यव्यक्तमालंबनंक्लेशसाध्यमितिसूचयति ॥ अव्यक्ताहिगतिर्दुःखंदेहवद्भिरवाप्यतइतिस्मृतेः वेदेइममात्मानंअविचिन्वन्वेदांतन्यायानप्यचिंतयन्नित्यर्थः ततःपश्चात्तंप्रभुं

पश्यतितंपश्यतिनिष्कलंध्यायमान इतिश्रुतेः॥४५॥तूष्णींभूतइत्यनेनवागादिबाह्येंद्रियव्यापारोपरमउक्तः मनसापिनचेच्छेत्नचेच्छेदित्यनेन मानसव्यापारोपरमउक्तः॥४६॥ मौनात्ध्यानमात्रान्मुनिर्भवतिनअरण्यवासात्संन्यासमात्रात् किंतर्हियोक्षरंप्रत्यगात्मनोलक्षणंजगज्जन्मादि

प्रत्यर्थिषुप्रतिपक्षभूतदेहेंद्रियादिनिमित्तंअविचिन्वन्विषयसंचयमकुर्वन्निमंप्रत्यगात्मानंवेदेषूपनिषत्सुतत्त्वमस्यादिवाक्येषुततः पश्चात्पश्यतितंप्रभुंपरमात्मानंआत्मत्वेनजानातीत्यर्थः॥ अथवानास्यात्मनःपर्येषणंअन्वेषणंगच्छेत्॥ प्रत्यर्थिषुप्रतिपक्षभूतदेहेंद्रियादिषुदेहेंद्रियतद्धर्मानात्मत्वेननगृण्हीयादित्यर्थः॥ अविचिन्वन्देहेंद्रियतद्धर्मानात्मत्वेनअसंचिन्वन्॥ तत्साक्षिणमात्मानमेवप्रतिपद्यमानस्तत्त्वंपदार्थशोधनानंतरमिमंप्रमात्रादिसाक्षिणंपरमात्मानंपश्यति॥ देहेंद्रियादिकमात्मत्वेनाप्रतिपद्यमानःतत्त्वमस्यादिवाक्यैःपरमात्मानमात्मत्वेनपश्यतीत्यर्थः॥ ४५ ॥ यस्मादेवंतस्मात्॥ तूष्णीमिती॥ यस्मात्सर्वविषयपरित्यागएवात्मदर्शनसिद्धिः॥ तस्मात्तूष्णींभूतःस्वात्मव्यतिरिक्तंसर्वंपरित्यज्यकेवलोभूत्वास्वात्मानमेवलोकमुपासीत॥ नचेच्छे

अविचिन्वन्निमंवेदेततःपश्यतितंप्रभुं ॥४५॥ तूष्णींभूतउपासीतनचेच्छेन्म
नसाअपि ॥ अभ्यावर्त्तेतब्रह्मास्मैबह्नंतरमाप्नुयात् ॥४६॥ मौनाद्धिसमुनि
र्भवतिनारण्यवसनान्मुनिः ॥ अक्षरंतत्तुयोवेदसमुनिःश्रेष्ठउच्यते ॥ ४७ ॥

न्मनसाअपिविषयेंद्रियेच्छांनकुर्यात्॥ यस्तूष्णींभूतोविषयोपसंहारंकृत्वास्वात्मानमेवलोकमुपास्ते॥ अस्मैतूष्णींभूतायब्राह्मणायब्रह्मापूर्वादिलक्षणंअभ्यावर्तेतअभिमुखीभवेदित्यर्थः॥ श्रूयतेच॥ यमेवैषवृणुतेतेनलभ्यःतस्यैषआत्माविवृणुतेतनुंस्वामिति॥ अनंतरमाविर्भूतस्वरूपःसन्बहुभूमानंतमसःपरंपरमात्मानमाप्नुयात्॥ ४६ ॥ मुनिरप्येषएवेत्याह॥ मौनाद्धीति॥ मौनात्पूर्वोक्तात्तूष्णींभावादेवमुनिर्भवतिनपुनररण्यवासमात्रान्मुनिर्भवति॥ तेषामपितूष्णींभूतानांमध्येयस्तुपुनरक्षरमविनाशिनंपरमात्मानंवेदअयमहमस्मीतिसाक्षाज्जानातिसमुनिःश्रेष्ठउच्यते॥ श्रूयतेच॥ एतमेवविदित्वामुनिर्भवतीति॥ ४७ ॥ वैय्याकरणो

हेतुत्वंसच्चिदानंदात्मकत्वंचवेदजानातिसश्रेष्ठः संन्यासिभ्योयोगिभ्यश्चज्ञानीश्रेष्ठइत्यर्थः॥ ४७ ॥ सर्वार्थानांव्याकरणात्प्रकटीकरणात्सर्वज्ञ

त्वादयंज्ञानीवैयाकरणइत्युच्यते तत्रव्याकरणंकेचियोगजधर्मप्रत्यासत्यावदंतितन्निराचष्टे ॥ मूलतइति ॥ आत्मज्ञानाद्धिसर्वविज्ञानंश्रूयतेनप्रधान ज्ञानात्अन्यतोवा मूलतइतिल्यब्लोपेपंचमी मूलंकारणंब्रह्मप्राप्येत्यर्थःतत्रव्याकर्तापरमात्मैव तन्नामरूपाभ्यामेवव्याक्रियत नामरूपेव्याकरवाणीतिश्रुतिभ्यामित्याह व्याकरोतीतिश्रौतव्युत्पत्तिप्रदर्शनमेतत् ॥ ४८ ॥ सार्वज्ञमपिब्रह्मविदामनौपचारिकमित्याह ॥प्रत्यक्षेति ॥ सत्येतिष्ठनन

प्येषएवेत्याह ॥ सर्वेति ॥ सर्वार्थानांव्याकरणाद्वैय्याकरण उच्यते ॥ नपुनःशब्दैकदेशव्याकरणात्वैय्याकरणोभवति ॥ भवतुसर्वार्थानांव्याकरणाद्वैय्याकरणत्वं॥ततःकिमितिचेत्तत्राह॥तन्मूलतोव्याकरणं॥पूर्वोक्तादक्षराद्धिसर्वस्यनामरूपप्रपंचस्यव्याकरणं॥ श्रूयतेच ॥ अनेनजीवेनआत्मनानुप्रविश्यनामरूपेव्याकरवाणीति ॥ तस्माद्ब्रह्मणएवसाक्षाद्वैय्याकरणत्वंव्याकरोतीतितत्तथाविद्वानपितत्ब्रह्मतथैवव्याकरोतीतिवैयाकरणः ॥ ४८ ॥ सर्वज्ञोप्येषएवेत्याह ॥ प्रत्यक्षेति ॥ प्रत्यक्षदर्शीलोकानांयःप्रत्यक्षेणभूरा

सर्वार्थानांव्याकरणाद्वैय्याकरणउच्यते॥तन्मूलतोव्याकरणंव्याकरोतीति
तत्तथा ॥४८॥प्रत्यक्षदर्शीलोकानांसर्वदर्शीभवेन्नरः ॥सत्येवैब्राह्मणस्तिष्ठं
स्तद्विद्वान्सर्वविद्भवेत् ॥ ४९ ॥ ज्ञानादिषुस्थितोप्येवंक्षत्रियब्रह्मपश्यति ॥

दीन्लोकान्पश्यतिससर्वदर्शनोभवेत् ॥ सर्वरूपंपरमात्मानंपश्यति ॥ असौपुनःसत्येसत्यादिलक्षणेब्रह्मणितिष्ठन्मनःसमादधाति ॥ तद्विद्वान्सत्यादिलक्षणंब्रह्मविद्वानात्मत्वेनसर्वंजानन्सर्वंजानातीत्यर्थः ॥ तस्मादेषएवसर्वज्ञोनानात्ममात्रदर्शी ॥ ४९ ॥ यस्त्वेतेभ्यइत्यादिनाउक्तमेवार्थंपुनरपिदर्शयत्यवश्यकर्तव्यत्वदर्शनार्थं॥ज्ञानेति ॥ ज्ञानादिषुज्ञानंचेत्यादिनापूर्वोक्तेषुस्थितोपि एवंयथासत्येतिष्ठन्ब्रह्मपश्यति ॥ वेदानांचारपूर्वेणवेदांतश्रवणादिकेनेत्यर्थः ॥ अथवागुणांतरविधानमेतत् ॥ ज्ञानादिषुस्थितो

तुव्त्त्यंतरेदेहाद्याकारे ब्राह्मणःब्रह्मवित् तद्विद्वान्ब्रह्मविद्वानितिब्राह्मणपदव्युत्पत्तिप्रदर्शनं ॥४९॥ अध्यायार्थमुपसंहरति ॥ ज्ञानादिष्विति ॥ ज्ञानंचसत्यंचदमःश्रुंतचेत्यादिषुद्वादशसुस्थितःतथासत्यादिरूपेअष्टविधे अप्रमादेचस्थितः एवंसाधनवान्वेदेषुपूर्वोक्तेषुआरोपदृष्टिव्यामिश्रदृष्टयपवाददृष्टिरूपेषुपूर्वेणसोपानारोहणन्यायेनपरमेपदेस्थितोहमेतत्स्वानुभवसिद्धंहेविद्वन्तेतुभ्यंब्रवीमि सोपानक्रमस्तुनृसिंहतापनीयेश्रूयते ओ

तानुज्ञाचनुज्ञाऽविकल्पैरिति अस्यार्थः ओतत्वंकारणंव्याप्तिः कार्येयद्वन्मृदोघटे सर्वंब्रह्मेतितन्निष्ठाजानतेपरिणामतः १ कार्यस्यासमसत्त्वयं त्कारणेसमुदीरितं तदनुज्ञातृशब्दार्थोमरौवारिविवर्तनं २ एतन्निष्ठास्ततोभूत्वाजगन्मिथ्येतिजानते अनुज्ञायांजगत्तुच्छंशशशृंगादिवन्मतं ३ ए

पिनकेवलंतन्मात्रेणपश्यतिअपितुएवमेव वक्ष्यमाणप्रकारेणवेदांतविचारपूर्वेणवेदांतश्रवणपूर्वकमेवपश्यतिब्रह्म ॥ एतद्वेदानां

वेदानांचारपूर्वेणचैतद्विद्वन्ब्रवीमिते ॥ ५० ॥ इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैय्यासिक्यामुद्योगपर्वणिकेधृतराष्ट्रसनत्कुमारसंवादेश्रीसनत्सुजातीयेद्वितीयोऽध्यायः ॥ २ ॥

चारंप्रकारं ॥ हेविद्वन्ब्रवीमिवक्ष्यामीत्यभिप्रायः ॥ ५० ॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदभगवत्पूज्यपादशिष्यश्रीशंकरभगवतःकृतौसनत्सुजातभाष्ये द्वितीयोध्यायः॥ २ ॥

वंसोपानरीत्यैवभूमित्रितयलंघनात् अविकल्पंपरयत्तदहंब्रह्मास्मिनिर्भयमिति ४ ॥ ५० ॥ इतिउद्योपर्वणिनैलकंठीयेभारतभावदीपेसनत्सुजातीयटीकायांद्वितीयोध्यायः ॥२ ॥

64

65

एवंआत्मज्ञानमार्गंश्रुत्वातस्यांतरंगसाधनंयोगंश्रोतुंपृच्छति सनत्सुजातेति परांउक्तादपिअत्युत्कृष्टांब्राह्मींब्रह्मप्रापिकांवाचंउपनिषदंवदसे जानीषे भासनोपसंभाषाज्ञानेतितङ् विश्वंरूप्यतेप्रकाशतेस्यां यांज्ञातवतोऽन्यत्ज्ञातव्यंनावशिष्यतइत्यर्थः कार्येषुप्रपंचेषुसुदुर्लभांकथां कथनीयांप्रब्रूहि हेकुमारइदंमेममवाक्यंत्वांप्रतिप्रार्थनारूपंवचनंअवधेहीतिशेषः ॥ १ ॥ ब्रह्मविद्यायाःदुर्लभत्वंदर्शयन्सनत्सुजातउवाच

अथ तृतीयोध्यायः॥इदानींब्रह्मचर्यादिसाधनप्रतिपादनानंतरंतत्प्राप्यंचब्रह्मप्रतिपादयितुंतृतीयचतुर्थावध्यायावारभ्येते॥तत्रतावद्ब्रह्मचर्यादिसाधनं श्रुत्वातद्वेदनाकांक्षीप्राहधृतराष्ट्रः॥ सनत्सुजातेति॥ हेसनत्कुमार॥यद्यस्मादिमांपरार्थांउत्कृष्टार्थांब्राह्मींब्रह्मसंबंधिनींवाचं वदसिहि ॥ विश्वरूपांनानारूपांपरांउत्तमां ॥ कार्येषुकार्यरूपेषुप्रपंचेषु॥सुदुर्लभांश्रवणायाप्यशक्यांकथांप्रब्रूहि॥मेवाक्यंएवं भूतं ॥ कुमार ॥ यस्मात्त्वंब्राह्मींवाचंपरमपुरुषार्थसाधनभूतांसुदुर्लभांवदसि ॥तस्मात्त्वंवक्तुमर्हसीत्यभिप्रायः॥ १॥

धृतराष्ट्रउवाच ॥ सनत्सुजातयदिमांपरार्थांब्राह्मींवाचंवदसिहिविश्वरूपां ॥ परांहिकार्येषुसुदुर्लभांकथांप्रब्रूहिमेवाक्यमिदंकुमार ॥ १ ॥ सनत्सुजातउवाच ॥ नैतद्ब्रह्मत्वरमाणेनलभ्यंयन्मांपृच्छस्यभिषंगेणराजन् ॥ बुद्धौप्रलीनेमनसिप्रचिंत्याविद्याहिसाब्रह्मचर्येणलभ्या ॥ २ ॥

एवंपृष्टःप्राहभगवान् ॥ नैतदिति ॥ नैतद्ब्रह्मत्वरमाणेनपुरुषेणलभ्यंयत्ब्रह्ममांपृछसि॥अभिषंगेनराजन्॥ कथंतर्हिलभ्यमित्याह ॥ बुद्धौअध्यवसायात्मिकायां प्रलीनेमनसिप्रचिंत्याविद्याहिसायदापुनः संकल्पविकल्पात्मकंमनोविषयेभ्यःपरावृत्यस्वात्मन्येवनिश्चलंभवतीत्यर्थः ॥ येयंबुद्धौप्रलीनेमनसिप्रचिंत्यासाविद्याब्रह्मचर्येणवक्ष्यमाणेनलभ्या ॥ २ ॥ किंच ॥ आयामि

नैतदिति हृष्यासिअहंब्रह्मविद्याधिकायर्स्मीतिदृप्यासि पाठांतरेअभिषंगेणनिर्बंधेन विद्यालक्षणमाह बुद्धाविति सर्वेषामिंद्रियाणांनिरोधेनमनोमात्रमनुपरतंसंकल्पाद्यात्मकंतिष्ठति तस्मिन्नपिअहंब्रह्मास्मीतिनिश्चयस्वभावायांबुद्धौविलीनेसति प्रचिंत्याप्रगतंचिंत्यंयस्यांसानिरुद्धसर्ववृत्तिकाकाचिदवस्थाविद्येत्युच्यते साचब्रह्मचर्येणगुरुकुलवासेनलभ्या ॥ २ ॥ किंचआयामिति बुध्याख्योपाधिसंबंधजनितका

लुष्यादविविक्ततयानव्यक्तमव्यक्तंब्रह्मतस्यविद्यां अयंभावः यद्यपिब्रह्मनित्यापरोक्षंआत्मत्वात्तथापिअशनायाद्यतीतस्यतस्यविविक्तस्यप

रोक्षत्वात्तदापराक्ष्यायत्नोयुक्तइति ॥ ३ ॥ अंजसाआर्जवेन ॥ ४ ॥ आचार्येति योनिःस्थानं योनिष्टइंद्रनिषदेअकारि स्वेयो

॥३१॥

ति ॥ आद्यासर्वादिभूतब्रह्मविषयांविद्यांवदासिहिसत्यरूपांपरमार्थरूपांमेब्रूहीति ॥ यद्वाआद्यामकार्यभूतांअसत्यप्रपंचावि

षयांविद्यांवदासितस्मादत्त्वरमाणेनब्रह्मचर्यादिसाधनोपेतेनउपसंहृतांतष्करणेनैवलभ्यामित्यर्थः ॥ याप्राप्यतेब्रह्मचर्येणसाद्भिः ॥

यांप्राप्यएनंमर्त्यलोकंत्यजंति ॥ यावैविद्यागुरुवृद्धेषु ॥ गुरुणाविद्याप्रदानादिनावृद्धेषुवर्द्धितेषुशिष्येषुनित्यानियता ॥ ३ ॥

एवमुक्तेब्रह्मचर्यविज्ञानायाहधृतराष्ट्रः॥ब्रह्मचर्येणेति ॥याविद्याब्रह्मचर्येणवेदितुंशक्यातत्साधनभूतंब्रह्मचर्यंकथंस्यादेतद्ब्रह्मचर्यं

आद्यांविद्यांवदसिहिसत्यरूपांयाप्राप्यतेब्रह्मचर्येणसाद्भिः॥यांप्राप्यैनंमर्त्यलोकंत्यजंतियावैवि
द्यागुरुवृद्धेषुनित्या ॥ ३ ॥ धृतराष्ट्रउवाच ॥ ब्रह्मचर्येणयाविद्याशक्यावेदितुमंजसा ॥ तत्कथंब्र
ह्मचर्यंस्यादेतद्ब्रह्मन्ब्रवीहिमे ॥ ४ ॥ सनत्सुजातउवाच ॥ आचार्ययोनिमिहयेप्रविश्यभूत्वा
गर्भंब्रह्मचर्यंचरंति ॥ इहैवतेशास्त्रकाराभवंतिविहायदेहंपरमंयांतिसत्यं ॥ ५ ॥

ब्रह्मनब्रवीहिमे ॥४॥ एवंपृष्टःप्राहभगवान्सनत्सुजातः ॥ आचार्येति ॥ आचार्ययोनिमिहयेप्रविश्यआचार्यसमीपंगत्वेत्यर्थः ॥

भूत्वागर्भंउपसदनादिनाशिष्योभूत्वाब्रह्मचर्यंगुरुशुश्रूषादिकंकुर्वंति ॥ इहैवास्मिन्लोकेशास्त्रकाराःशास्त्रकर्त्तारःपंडिताभवं

ति ॥ ततोबाल्यादिकंनिर्विघ्नब्राह्मणत्वारब्धकर्मक्षयेविहायदेहंपरमंयांति ॥ सत्यंसत्यादिलक्षणंपरमात्मानंप्राप्नुवंति ॥ ५ ॥

॥३१॥

नौनिषदतंसरूपाइत्यादौदर्शनात् गर्भंभूत्वातस्यनिष्कपटसेवयाअंतरंगत्वंप्राप्येत्यर्थः शास्त्रकाराःशास्त्रकर्तृत्वंब्रह्मण्येवश्रुतंमहतोभूतस्य

निःश्वसितमेतदृग्वेदइत्यादिना गुरोरनुग्रहादिहैवब्रह्मभावंप्राप्नुवंतीत्यर्थः परमंअपुनरावृत्तिं सत्यंब्रह्मणासहऐक्यंयांति ॥ ५ ॥ अस्मिन्निति

67

येजितकामाःब्राह्मींस्थितिंप्राप्तुंयेचद्वंद्वसहाःतेदेहादात्मानंनिर्हरंतिपृथक्कुर्वंति श्रुतिश्च तंस्वाच्छरीरात्प्रवृहेन्मुंजादिवइषीकांधैर्येणेति प्रवृहेत्पृथक्कुर्यात् ॥ ६ ॥ आचार्यतःयज्जन्मतदेवसत्यं यथाब्राह्मणस्यसावित्रीप्राप्त्यासावित्रंद्वितीयंजन्मएवंआचार्यात्परब्रह्मविद्याप्राप्त्यापितस्य

किंच ॥ अस्मिन्निति ॥ अस्मिँल्लोकेविजयंतीहकामान् ब्राह्मीमेवस्थितिंब्रह्मण्येवास्थितिं ॥ अनुतितिक्षमाणाःअनुदिनंक्षममाणाः तेआत्मानंदेहेंद्रियादिभ्यो निष्क्रम्यतत्साक्षिणंचिन्मात्रंनिर्हरंतिपृथक्कुर्वंति ॥ निर्वहंतिइतिपाठेनिर्वासयंतीत्यर्थः॥ किमिवेति ॥ मुंजादिषीकामिव ॥ यथामुंजादिषीकामंतस्थांनिर्हरंति॥ एवंकोशपंचकेभ्योनिष्क्रम्यसर्वात्मानंप्रतिपद्य तइत्यर्थः ॥ श्रूयतेचकठवल्लीषु ॥ अंगुष्टमात्रःपुरुषोंतरात्मासदाजनानांहृदयेसन्निविष्टः ॥ तंहस्वाच्छरीरात्प्रवृहेन्मुंजादिवैषिकांधैर्येणतंविद्यात्शुक्रममृतमिति ॥ धीरभावाद्धैर्येण ॥ ६ ॥ आचार्ययोनिमिहेति ॥ आचार्यस्ययोनित्वंदर्शितंतत्कथंमाता

अस्मिँल्लोकेवैजयंतीहकामान्ब्राह्मींस्थितिमनुतितिक्षमाणाः ॥ तआत्मानंनिर्हरंतीहदेहान्मुंजादिषीकामिवधीरभावान् ॥ ६ ॥ शरीरमेतौकुरुतःपितामाताचभारत ॥ आचार्यतश्चयज्जन्मतत्सत्यंवैयथामृतं ॥ ७ ॥

पितृव्यतिरेकेणआचार्यस्ययोनित्वमित्याशंक्यसएवसाक्षाज्जनयितेत्याह ॥ शरीरमेताविति ॥ शरीरमेवास्यैतौमातापितरौकुरुतः ॥ नात्मानंस्वरूपेणजनयतः ॥ यदिदंदेहद्वयात्मनाजन्मतदसत्यं ॥ आचार्यतस्तुयदिदंचित्सदानंदाद्वितीयब्रह्मात्मनाजन्मजननंतत्सत्यंपरमार्थभूतं ॥ यथैवामृतंविनाशवर्जितंतस्मात्सएवजनयितेत्यर्थःश्रूयतेच ॥ प्रश्नोपनिषदि ॥ त्वंहिनःपितायोअस्माकंअविद्यायाः परंपारंतारयसीति ॥ तथाचाहापस्तंबः ॥ सहिविद्यातस्तंजनयतितत्श्रेष्ठंजन्मशरीरमेवमातापितरौजनयतइति ॥ ७ ॥ यस्मादाचार्याधीनापरमपुरुषार्थसिद्धिस्तस्मात्सेति ॥ सआवृणोतिआपूरयति ॥ अमृतंपूर्णानंदंब्रह्मजन्मांतरंभवति तच्चमोक्षहेतुत्वात्पुण्यत्वादिगुणसंयुक्तं ॥७॥आचार्यमाहात्म्यप्रख्यापकंमंत्रं पठति सआवृणोतीति यःआचार्यःवर्णान् ब्राह्मणा

दीन् अवितथेनावितथमनृतमनात्माजडंतदन्येनसत्येनचिदात्मनाप्रकर्षेणआवृणोतिसबाह्याभ्यंतरंवासयति द्वैतोत्थभयनिवारणेनपालयतीत्यर्थः
तस्यफलमाह अमृतंसंप्रयच्छान्निति अमृतंमोक्षं कृतंतत्कृतमुपकारं अप्रमत्तःगुरुशुश्रूषायांसावधानः ॥८॥ शिष्यवृत्तिःसायंप्रातर्भिक्षणेनजीवनं
आत्मत्वेनसंप्रयच्छन् ॥ तस्मैआचार्यायनद्रुह्येत्द्रोहंनाचरेत् ॥ तथाचश्रुतिः ॥ यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ ॥ तस्यैते
कथिताह्यर्थाःप्रकाश्यंतेमहात्मनइति ॥ तथाचापस्तंबः ॥ तस्मैनद्रुह्येत्कदाचनसहिविद्यातस्तंजनयतीति ॥ कृतमस्यजान
न् ॥ अस्येतितृतीयार्थेषष्ठी ॥ अनेनात्मनःकृतमुपकारंजानन् ॥ कथंतर्हिकर्त्तव्यमित्याह ॥ गुरुंशिष्योनित्यमभिवादयी
तदेवमिवाचार्यमुपासीत ॥ तथाचश्रुतिः ॥ यस्यदेवइति ॥ तथास्वाध्यायमिच्छेत्श्रवणादिपरोभवेच्च ॥ सदाऽप्रमत्तः ॥

**सआवृणोत्यमृतंसंप्रयच्छन्तस्मैनद्रुह्येत्कृतमस्यजानन् ॥ गुरुंशिष्योनित्यमभिवादयी
तस्वाध्यायमिच्छेच्चसदाऽप्रमत्तः ॥ ८ ॥ शिष्यवृत्तिक्रमेणैवविद्यामाप्नोतियःशुचिः ॥ ब्रह्म
चर्यव्रतस्यास्यप्रथमःपादउच्यते ॥ ९ ॥ यथानित्यंगुरौवृत्तिर्गुरुपत्न्यांतथाचरेत् ॥ तत्पुत्रेचत
थाकुर्वन्द्वितीयःपादउच्यते ॥१०॥ आचार्येणात्मकृतंविजानन्ज्ञात्वाचार्थंभावितोस्मीत्यनेन ॥**

अप्रमादीसन् ॥ ८ ॥ इदानींचतुष्पादब्रह्मचर्यंश्लोकचतुष्टयेनाह ॥ शिष्येति ॥ आचार्ययोनिमिहइत्यादिनाउक्तक्रमे
णशुचिर्विद्यामाप्नोति ॥ ब्रह्मचर्यस्यास्यप्रथमःपादउच्यते ॥ ९ ॥ यथेति ॥ स्पष्टोर्थःश्लोकः ॥तथाचोक्तं ॥ आचार्यवदाचार्य
दारेषुवृत्तिराचार्यपुत्रेचतथावृत्तिश्चेति ॥ १० ॥ आचार्येणेति ॥ आचार्येणात्मनःकृतमुपकारंजानन्ज्ञात्वाचार्थंवेदार्थपरमपुरुषा
र्थंज्ञात्वाअवगम्यभावितोस्मीत्यनेनस्वाभाविकचित्सदानंदाद्वितीयब्रह्मात्मनायथावदुत्पादितोस्मीतिचिंतयन्तमाचार्यंप्रतिहृष्टबु ॥३२॥
तेनैवक्रमेणनतुगुर्वन्नोपजीवनेनेत्यर्थः ॥ ९ ॥ ब्रह्मचर्यस्यप्रथमंपादमुक्त्वाद्वितीयंपादमाह यथेति ॥१०॥ प्राप्तविद्योविद्यासुखेनहृष्यन्आचार्यं
यत्अत्यंतंमानयतिसब्रह्मचर्यस्यतृतीयःपादइत्याह आचार्येणेति आत्मकृतंस्वस्मैउपकृतंविद्यादानेनतस्यचअर्थंप्रयोजनंदुःखनिवृत्तिमानंदावा

त्तिंचज्ञात्वाऽनुभूयअनेनाचार्येणभावितोवर्धितोस्मीतिजानन्नूयन्मन्यते ॥११ ॥ आचार्यायेतिश्लोकस्य स्पष्टोर्थः ॥१२॥ चतुष्पाद्ब्रह्मचर्येणल भ्यांचतुष्पदींविद्यामाह कालेनेति कालेनबुद्धिपरिपाकेन उत्साहयोगेनबुद्धिवैभवेन शास्त्रेणसहाध्यायिभिर्विचारेण क्रमस्तुनविवक्षितः उक्तंच

द्धिःसन्यदात्मनःकृतार्थत्वंमन्यतेसवैतृतीयोब्रह्मचर्यस्यपादः ॥ ११ ॥ आचार्यायेति ॥ स्पष्टोर्थः ॥ १२ ॥ इदानींचतुष्प दींविद्यांदर्शयाति ॥ कालेनेति ॥ अत्रक्रमोनविवक्षितः ॥ प्रथमंगुरुयोगतः ॥ ततउत्साहयोगेनबुद्धिविशेषप्रादुर्भावेन ॥ ततःकालेनबुद्धिपरिपाकेनतथार्थमितिपादविशेषणं ॥ ततःशास्त्रेणसहाध्यायिभिःतत्वविचारेण ॥ तथाचोक्तं ॥ आचार्या त्पादमादत्तेपादंशिष्यःस्वमेधया ॥ कालेनपादमादत्तेपादंसब्रह्मचारिभिरिति ॥ १३ ॥ ज्ञानादीनामाचार्यसंनिधानेफलमाह ॥

यन्मन्यतेतंप्रतिहृष्टबुद्धिःसवैतृतीयोब्रह्मचर्यस्यपादः ॥ ११ ॥ आचार्यायप्रियं
कुर्यात्प्राणैरपिधनैरपि ॥ कर्मणामनसावाचाचतुर्थःपादउच्यते ॥ १२॥ कालेन
पादंलभतेतथार्थंततश्चपादंगुरुयोगतश्च ॥उत्साहयोगेनचपादमृच्छेत्शास्त्रेणपा
दंचततोभियाति ॥ १३ ॥ ज्ञानादयोद्वादशयस्यरूपमन्यानिचांगानितथा
बलंच ॥ आचार्ययोगेफलतीतिचाहुर्ब्रह्मार्थयोगेनचब्रह्मचर्यं ॥ १४ ॥

ज्ञानेति ॥ ज्ञानादयोज्ञानंचेत्यादिनापूर्वोक्ताद्वादशगुणाःयस्यपुरुषस्यरूपं ॥ अन्यानिचांगानिश्रेयांस्तुषट्विधस्त्यागःसत्यंध्यान मितिश्लोकद्वयेनचोक्तानि ॥ तथाबलंच ॥ तद्धर्मपरिपालनसामर्थ्यंसर्वमाचार्ययोगएवफलति ॥ नाचार्ययोगंविनाफलति ॥ श्रूयतेच ॥ आचार्याद्धैवविद्याविदितेति ॥ आचार्यवान्पुरुषोवेदेतिचब्रह्मार्थयोगेनचब्रह्मचर्यं ॥ यदिदंगुरुसन्निधौशुश्रू

आचार्यात्पादमादत्तेपादंशिष्यःस्वमेधया कालेनपादमादत्तेपादंसब्रह्मचारिभिरिति ॥१३ ॥ज्ञानादयइति यस्यब्रह्मचर्यस्यरूपंस्वरूपभूताइत्यर्थः अन्यानिचांगानिआसनप्राणजयादीनि बलंयोगेनित्योयुक्तता ब्रह्मार्थोवेदार्थः कर्मब्रह्मणीतयोर्योगेनअधिगमेनब्रह्मचर्यफलतीत्यर्थः ॥१४॥

॥ १५ ॥ १६ ॥ आकांक्ष्येति रसभेदःपारदगुटिकाविशेषश्चिंतामणिसंज्ञस्तच्चिंतितवस्तुप्रदंअर्थयंतेतेषांरसभेदार्थिनांयथाआकांक्ष्यस्यलिप्सि
तस्यार्थस्यसंयोगः प्राप्तिस्ततोयादृक्भावोभवतिएवमेवएतेदेवादयः समाज्ञायब्रह्मचर्यमुपेत्यतादृग्भावंसत्यसंकल्पत्वाच्चिंतितवस्तुप्रदत्वंगताः
षाद्याचरणंततब्रह्मचर्यंब्रह्मार्थयोगेनफलति ॥ स्वात्मनःचित्सदानंदाद्वितीयब्रह्मात्मैकत्वसंपादनद्वारेणफलतीत्यर्थः
॥ १४ ॥ ब्रह्मचर्यस्तुतिंकरोति ॥ एतेनेतिद्वाभ्यां ॥ पादसप्तकस्यस्पष्टोर्थः ॥ अन्होदीतिसमूहः ॥ अन्हायजगतांद्योतनाय
सूर्यश्चजायते ॥ उक्तंच ॥ अन्होदीतिश्चकथ्यतइति ॥ १५ ॥ १६ ॥ कथमेकस्यब्रह्मचर्यस्यानेकफलसाधनत्वमित्याह ॥
आकांक्षेति ॥ यथाचिंतामण्यादयोरसभेदार्थिनांआकांक्षार्थस्यसंयोगात्तत्तदाकांक्षितमर्थंप्रयच्छंति ॥ एवमेवैतत् ॥ ब्रह्मचर्य

एतेनब्रह्मचर्येणदेवादेवत्वमाप्नुवन् ॥ऋषयश्चमहाभागाब्रह्मचर्येणचाभवन् ॥१५॥
एतेनैवसगंधर्वाॠपमप्सरसोजयन् ॥ एतेनब्रह्मचर्येणसूर्यअन्हायजायते ॥ १६ ॥
आकांक्षार्थस्यसंयोगाद्रसभेदार्थिनामिव ॥ एवंह्येतत्समाज्ञायतादृग्भावंगता
इमे ॥ १७ ॥ अंतवंतःक्षत्रियतेजयंतिनानंतंस्वात्मभूतंजयंति ॥

माकांक्षार्थस्यसंयोगात्तत्तदाकांक्षितंप्रयच्छतीतिज्ञात्वातत्तत्फलार्थंब्रह्मचर्यंचरित्वातादृग्भावंगताइमेदेवादयः ॥ यस्मादाचार्य
सांनिध्यानुष्ठितात्ब्रह्मचर्यात्परमपुरुषार्थप्राप्तिस्तस्मादाचार्ययोनिंप्रविश्यगर्भोभूत्वाब्रह्मचर्यंचरेदित्यर्थः ॥१७॥ नन्वेवंज्ञाननि
